5. Mr. Anantachari complains that Messsrs. Rangachari and Swaminatha Aiyar were never properly appointed President and Secretary at any public meeting at Conjeevaram, and is of opinion that the informal proceedings of the friends of Dr Sir S. Subramania Aiyar assembled at Beach House making such appointments are simply *ultra vires.* I do not see why a public meeting at Conjeevaram was required to give validity to the appointment of these two gentlemen. In any case the Pandits invited, and the subscribers have no reason to complain as these two names appear as those of the President and Secretary in the joint prospectus issued on the 2nd February. Further I do not see why the Conjeevaram public, as distinguished from the general public, who did not subscribe anything to the Parishad funds should have any voice in deciding the issues to be placed before the Parishad or the persons to be placed in charge of the arrangements and proceedings.

6. Mr. R. Swaminatha Aiyar is technically wrong in saying that the original programme of the Conjeevaram people did not include the marriageable age of girls; for the notice of the 5th January refers to the marrigeable age of boys and girls as one of the subjects deserving discussion. But as now explained by Mr. Anantachari this reference merely meant that the question was to be shelved by merely raising girls' marriageable age to twelve or thirteen so as still to be well within the pubertal period. What Mr. Swaminatha Aiyar refers to is apparently the "post-pubertal marriage of girls" and this the Conjeevaram people appear to have ultimately included in the programme as the price

to be paid to secure the co-operation of the Madras *Laukikas*. This is clear from the Sanskrit subject-list forwarded to the Pandits as an enclosure to the letters of invitation, in which the following questions occur:—"What expiation is prescribed for a father whose girl attains puberty while he is in search of a suitable husband for her? Is such a girl to be married according to the rule of *Kanyadana* or of *Svayamvara*? Can a Brahman girl be married according to Svayamvara rule?" These questions did not give prominence to the views of an orthodox school of Pandits small in numbers at present, who maintain that according to the Sastras girls should be married after puberty. In order to give prominence to this School Mr. R. Swaminatha Aiyar, at the suggestion of some Madras Committee members, proposed the following questions for discussion during the preliminary sittings; "Is the bedding of the bridegroom and the bride, prescribed in the Grihya Sutras, on the fourth night of a Brahman wedding an integral part of the marriage cermony? Do the Sastras prescribe post puberty marriages for girls or at least allow such marriages as an inferior alternative?" It was the discussion of these questions that Mr. Anantachariar opposed taking on himself to speak on behalf of the Pandits; but as appeared subsequently the Pandits had no objection to discuss them. The issue was thus not between Mr. Swaminatha Aiyar and the Conference. Nor was it one between Mr. Swaminatha Aiyar and the Conjeevaram Committee, for the former had the support of all the Madras members present It was, as stated by Mr. Swaminatha Aiyar, an issue between the Madras Committee and the Conjeevaram *Acharyas*, and the object of the latter was, it was feared by several of Madras members, to crowd out the question by prolonging a wordy warfare on other questions in the subject-list.

7. The statement that the Secretary refused to pay batta to some of the invited Pandits is a gross perversion of an incident for which Mr. Anantachariyar himself was respon-

sible. The Secretary obtained 25 bags of rice from Madras for feeding the Pandits and other visitors, but as it turned out, it was found unnecessary to have obtained so much rice. For the Conjeevaram Branch Math of Jagadguru Sri Sankarachari Swamigal of Kumbakonam undertook the feeding of all the Smarta Brahmans that attended the Parishad. All the Pandits that came from Mysore had been paid batta and travelling allownce either by the Mysore Government or by Sirdar Kanta-Raj Urs, Esq., and the Perishad Committee had merely to provide accommodation for the Mysore Pandits. The only Pandits that had to be fed out of the Parishad funds were about half a dozen Sri Vaishnavas who did not belong to Conjeevaram. Provisions were, however; being issued not only to these but also to some of the Mysore Pandits in contravention of the instructions of the Secretary. On the 2nd or the 3rd day of the Conference I brought to the notice of Mr. Swaminatha Aiyar that there were only 19½ bags of rice in the store-room ; as such a large quantity as 5½ bags could not have been expended if the issue of provisions had been restricted to people entitiled to it the Secretary called for an account and for the keys of the store-room. Mr. Anantachari refused to furnish either and the Secretary ordered a second lock to be put on the store-room. It was I that put this lock ; the lock was, however, removed after a few hours mainly with the object of avoiding an *impasse.* The store-room was under double lock from 2 P. M. to 9 P. M. *i, e.* for seven hours.

8. I Will now enumerate the mis-statements in Mr. Annantachary's letter :—

(I) Dr. Sir S. Subramania Aiyar never said that the ancient *Acharams* of the Hindus were *Dushtacharms.* What he characterised as *Dushtacharam* was the present practice of marrying boys immediately after *Upanayanam* to girls of five

and three in contravention of the Sastras which require that a Brahmachari should spend a considerable number of years in study.

(2) Mr, M. Rangacharyar never called the three men selected by him during Vakyartha, *Madhyasthas* but insisted on calling them his Assistants.

(3) Mr. R. Swaminatha Aiyar never refused to pay batta to any of the invited Pandits.

(4) The credit of having convened the Parishad cannot be claimed by Mr. P. B. Anantachary; on the other hand he nearly wrecked the Parishad.

(5) Though Mr. Swaminatha Aiyar is techinically inaccurate in stating that the original Conjeevaram programme did not include the marriageable age of girls, he was perfectly right in saying that the Conjeevaram Pandits had to include the question of *post-puberty marriage* in their programme in order to secure the co-operation of of the Madras people and that the Vakyartha system proposed by them would have crowded out this question.

(6) Mr, Ananthachariar asks why the Acharyapurushas of Conjeevaram forced the dissolution of the Conference if as is represented it was their interest to have a favourable opinion obtained on the sea-voyage and the converts questions. The reply is obvious. The Acharyas thought that there were only two alternatives before the Madras members, either dissolution and going home or yielding to the demand of the Acharyas. They knew that the former alternative which would expose the Madras gentry to the laughter and ridicule of all enemies of Hinduism would never be adopted and drove the President and the Secretary to a corner, not knowing that a third alternative had been provided. When dissolution was threatened some of them thought that it would only be an adjournment.

(7) Mr. Ananthachari seems to have been under the impression that the Conference would elect its own President and decide the method of conducting discussions. These questions had been decided previously as is clear from the prospectus and the proceedings of the Committee. Mr. Ananthachari is thus entirely out of touch with the arrangements made.

(8) The co-operation of the Madras people was obviously sought for from financial considerations, the intention being to play the proverbial game of அவல் and உமி the Madras men supplying the former. The question of seavoyage is solving itself slowly and is of minor importance compared to the question of "the marriageable age of Brahman girls", and it was this latter question that the Madras people were particularly anxious to have fully discussed. Mr. R. Swaminatha Aiyar, exhibited great firmness, which Mr. Anantachari and his friends naturally call *obstinacy*, in insisting upon and securing a full discussion of this question. This was impossible so long as the Conjeevaram *Acharyas* were able to obstruct work in their capacity as members of the Working Committee. They overreached themselves by forcing the President to dissolve the Parishad forgetful of the circumstance that they will not have any power of interference in any new Parishad that the Madras members may convene. They are of course naturally very angry with Mr, Swaminatha Aiyar and this anger finds its natural vent in personalities asd misrepresentation. But the public must remember that it was on account of the precautions taken by Mr. Swaminatha Aiyar and the firmness exhibited by him that some real work was done at the Conjeevaram Parishad.

SACHITHANANDENDRA SARASVATI.

MADRAS, *July 10.*

THE BRAHMAVADIN PRESS, MADRAS.

# काञ्ची परिषदि समवेतानां पण्डितानां

## नामधामादिकम्

### अङ्काश्च

---

| | Names. | Designation &c. |
|---|---|---|
| 1. | सोमनाथशास्त्री | जगन्नाथम्-औरिसा. |
| 2. | काव्यतीर्थ जयकृष्णमिश्रः | जगन्नाथम्-औरिसा. |
| 3. | हाथीभाई शङ्करशास्त्री | जामनगरम्-कत्यावरम्. |
| 4. | कविदयाशङ्कर-रविशङ्करः | काव्यवाचस्पतिः-कांबे. |
| 5. | महामहोपाध्याय तात सुब्बरायशास्त्री | विजयनगरसंस्कृतविद्याशालाध्यक्षः. |
| 6. | नवङ्कूरि वेङ्कटाशास्त्री | विजयनगरसंस्कृतविद्याशालायांव्याकरणाध्यापकः. |
| 7. | किडांबि-श्रीनिवास धर्माचार्यः | पण्डितः विजयनगर महाराज विद्या शालायाम्. |
| ८. | दैवज्ञचक्रवर्ति ताण्डव कृष्णमाचार्यः | वेदशाला-विशाखपत्तनम्. |
| 9. | व्याकरणाचार्यसदाशिवशास्त्री. | पुष्पगिरीयमठगुरूणां विद्यासहकारी. |
| 10. | उपद्रष्टा-मणिगण्ड सुब्रह्मण्यशास्त्री | अमलापुरम्. |
| 11. | परिमि नरसिंह शास्त्री | बण्डार् हैस्कूल्पण्डितः. |
| 12. | स्वयंपाक- सूर्यनारायणशास्त्री | अध्यक्षः-शृङ्गगिरिमठं-अङ्गोलम्. |
| 13. | महाविद्वान् मण्डिकल् रामशास्त्री | महीशूरमहाराज-महाविद्यामन्दिरे पण्डितः. |

| Names. | Designation &c. |
|---|---|
| 14. महाविद्वान् नरहरिदैवज्ञः | महीशूरपुरम्. |
| 15. महाविद्वान् मायकोण्डकृष्णाचार्यः | महीशूरमहाराजास्थानविद्वान् |
| 16. महाविद्वान् लक्ष्मीपुरं श्रीनिवासाचार्यः | महीशूरमहाराजास्थानविद्वान्. |
| 17. महाविद्वान् काशीशेषवेङ्कटाचलशास्त्री | महीशूरमहाराजास्थानविद्वान्-दारवार |
| 18. महाविद्वान् विश्वेश्वरशास्त्री | बङ्गलूर सेन्टरल्कालेज् संस्कृतपण्डितः |
| 19. काशीशेषसुब्रह्मण्यशास्त्री. | |
| 20. गुण्डशास्त्री | महीशूरमहाराजास्थानपण्डितः. |
| 21. चक्रवर्ति राजगोपालाचार्यः | अध्यापकविद्यार्थी महीशूरपुरम्. |
| 22. कानकान खल्लि-नरसिंहशास्त्री | ज्योतिश्शास्त्रपण्डितः बङ्गलूर चामराजेन्द्रसंस्कृतमहाविद्यामन्दिरम्. |
| 23. दोड्डुबेले-नारायणशास्त्री- | बङ्गलूर् हैस्कूल पण्डितः. |
| 24. तुप्पिल् वेङ्कटाचार्यः | आगमपरीक्षकः बङ्गलूर्. |
| 25. जयराम वेङ्कटाचार्यः | बङ्गलूर हैस्कूल्पण्डितः |
| 26. के-रङ्गस्वामि अय्यङ्गार | पण्डितः महीशूरपुरपुस्तकालयम्. |
| 27. गरणि वैयाकरण कृष्णाचार्यः | बङ्गलूर सेन्टरल कालेज् पण्डितः. |
| 28. काक्कायि सुब्रह्मण्यशास्त्री | संस्कृतपण्डितः षिमोगा. |
| 29. श्रीनिवासशास्त्री | नामक्कल् बोर्ड् हैस्कूल्पण्डितः. |
| 30. मोहनकुमारकालहस्तीश्वरः | देवस्थानधर्मकर्ता. |
| 31. शेषाचलदीक्षितः | पनियूर. |
| 32. रामस्वामिशास्त्री | काञ्चीपुरम्. |
| 33. वङ्गिपुरं वरदाचार्यः | तिरुमलिशै. |
| 34. रामनाथ शास्त्री | काञ्चीपच्चयप्पविद्यालयपण्डितः. |
| 35. पट्टत्तूर श्रीनिवासाचार्यः | तिरुमलिशै. |
| 36. दोड्डयाचार्यः | तल्लम्. |

| Names. | Designation &c. |
|---|---|
| 37. कुप्पुस्वामि शास्त्री | ब्रह्मदेशम्. |
| 38. नागेश्वरशास्त्री | ब्रह्मदेशम्. |
| 39. महामहोपाध्यायः आर् - चन्द्रशेखरशास्त्री | संस्कृतमहाविद्यामन्दिराध्यक्षः मैला-पुरम्. |
| 40. पि. पञ्चापगेशशास्त्री | वेदान्ताध्यापकः संस्कृतमहाविद्याम-न्दिरं मैलापुरम्. |
| 41. टी-वी-श्रीनिवासशास्त्री | धर्मशास्त्राध्यापकः संस्कृतमहाविद्या-मन्दिरम् मैलापुरम्. |
| 42. एस् के रामनाथशास्त्री | वेदविशारदः मैलापुरम्. |
| 43. एस्. के पद्मनाभशास्त्री | वेदान्तविशारदः अडयार पुस्तकालय पण्डितः. |
| 44. टी. एन्. नरसिंहाचार्यः | प्रेसिडन्सि कालेज् संस्कृतपण्डितः |
| 45. गिरानन्दसरस्वती | -आर्यसमाजम् मद्रपुरम्. |
| 46. तिरुमलैकाण्डूर् रामानुजाचार्यः | मद्रपुरम्. |
| 47. एस्. कुप्पुसामिशास्त्री- | तिरुवादि संस्कृतमहाविद्यामन्दि-राध्यक्षः. |
| 48. नीलकण्ठशास्त्री | तिरुवादि. |
| 49. वि. रङ्गनाथाचार्यः | तिरुवादि संस्कृतमहाविद्यामन्दिरा-ध्यापकः. |
| 50. एस्. माधवाचार्यः | न्यायपण्डितः तिरुवादि संस्कृतमहा-विद्यामन्दिरम्. |
| 51. अभिनवभट्टबाणः आर. वि. कृष्णमाचार्य | व्याकरणपण्डितः तिरुवादिसंस्कृतमहा-विद्यामन्दिरम्. |
| 52. आर्. शेषाद्रयाचार्यः. | तिरुवादि संस्कृतमहाविद्यामन्दिरा-ध्यापकः. |
| 53. नटेशशास्त्री | कडलंगुटि नान्निलम्. |
| 54. टि. आर् कृष्णाचार्यः | मध्वविलासं कुंभघोणम्. |

| | Names. | Designation.&c. |
|---|---|---|
| 55. | सुन्दरशास्त्री | शिवरामपुरम्. |
| 56. | नारायणवाजपेय: | तिरुवालूर हैस्कूल् पण्डित:. |
| 57. | दण्डपाणिदीक्षित: | संस्कृतपण्डित: चिदम्बरम् |
| 58 | नटेशदीक्षित: | चिदम्बरम्. |
| 59. | सीतारामशास्त्री | धर्मशास्त्रसभापण्डित: मधुरापुरी. |
| 60. | पि बि. अनन्ताचार्य: | मञ्जुभाषिणीसंपादक:, काञ्चीपुरम्. |
| 61. | श्रीशैलताताचार्य: | काञ्चीपुरम्. |

आदौ पाण्डित सूच्या मनिर्दिष्टा: पश्चादागता: विचारविषयेषु स्वाशयमप्याविष्कृतवन्त: पाण्डिता:—

| | | |
|---|---|---|
| 62. | श्रीशैलदेशिकाचार्य: | इलनगरम्. |
| 63. | चक्रवर्ति राघवाचार्य: | काञ्ची. |
| 64. | विरक्ति कृष्णदास:— | मुसरपाक्कम्. |
| 65. | वेङ्कटवरदाचार्य:— | काञ्ची. |
| 66. | त्रि. अनन्ताचार्य:— | चेट्पेट्ट्. |
| 67. | रामनाथशास्त्री | -आर्यसिद्धान्तपाठशाला—मद्रपुरी. |
| 68. | वेङ्कटकृष्णमाचार्य: | काञ्ची. |
| 69. | विद्वान् तिरुवेङ्कटाचार्य:— | काञ्ची. |
| 70. | चक्रवर्ति गोपालाचार्य: | काञ्ची. |
| 71. | श्रीनिवास शठगोपाचार्य: | महीशूरपुरम्. |

अधोनिर्दिष्टाः पण्डिताः द्वितीयपरिषदि न संनिहिताः—

| | |
|---|---|
| i कुन्नपाक्कं शीनिवासाचार्यः | काञ्ची. |
| ii काण्डूर्. रङ्गाचार्यः | काञ्ची. |
| iii इ. इ. देशिकाचार्यः | काञ्ची. |
| iv विरक्ति भाष्यकाराचार्यः | काञ्ची. |
| v घण्टावतारम् आचार्यः | काञ्ची. |
| vi रङ्गनाथाचार्यः | इञ्जिमेडु. |
| vii कपिस्थलं देशिकाचार्यः | तिरुप्पति. |
| viii तिरुमलै ताताचार्यः. | काञ्ची. |
| ix बालधन्वि वेङ्कटाचार्यः. | काञ्ची |

x नवनिरामानुजाचार्यः.
xi आनिकलू श्रीनिवासाचार्यः.
xii किलत्तूरु रङ्गाचार्यः
xiii पण्डितरत्नं कुप्पनय्यङ्गार्.
xiv तर्कतीर्थ लक्ष्मीताताचार्यः,
xv मण्डयं आण्डपाल्लि आलुवार तिरुमलै अय्यङ्गार.
xvi नग्गिप्पाल्लि तिरुमलाचार्यः
xvii महाविद्वान् पि राघवेन्द्राचार्यः
xviii महाविद्वान् रामचन्द्राचार्यः,
xix पि. श्यामाचार्यः.
xx अय्याघनपाठी.
सुब्बावधानी.

(x–xx: महीशूरपुरम्)

---

# समुद्रयानम् I.

## पण्डितानामाशयाः

एप्रिल् मासस्याष्टमे दिवसे सायं गृहीतानां पारिषद्याशयानां संग्रहण विवेचनम्—

अत्र विषये आहत्य पञ्चाशतः 50 पण्डितानामाशया गृहीताः

I. प्रथमः प्रश्नः—किं समुद्रयानमात्रं पापापादकम्? उत देशकालोद्देशविशेषादिपरिच्छिन्नं यानम्?

अत्र

(क) समुद्रयानमात्रस्य पापापादकत्वेऽभिनिविशमानानामङ्काः—
3—8—10—21—23—29—33—34—36—40—41—43—44—46—48—49—50—53.

आहत्य अष्टादश (18) पण्डिताः।

(खं). देशकालोद्देशविशेषादिपरिच्छिन्नमेव यानं पापापादकमिति अभिप्रयतामङ्काः—

5—6—7—12—13—14—15—16—17—18—20—22—25—26—27—28—30—35—39—42—51—52—54—55—59—66—69—

आहत्य सप्तविंशतिः (27) पण्डिताः।

(ग) द्विरात्रातिरिक्तमेव यानं पापापादकमिति वदतोरङ्कौ—11—24—

(घ) अभ्यस्यमानमेव यानं तथेति-56-संख्याङ्कितस्य पण्डितस्याशयः।

(ञ) सर्वथा समुद्रयाने दोषो नास्तीति-45-संख्याङ्कितस्य पण्डितस्याशयः ।

इतोऽन्यस्यैकस्य कस्य चित् प्रत्युत्तरमनिर्दिष्टनामधामादिकमित्युपेक्षितम् । गृहीतेषु चाशयेषु, यत्र विशेषाः सन्ति, ते अधः प्रकाश्यन्ते —

(11). द्विरात्रकालातिरिक्तकालपरिमाणक समुद्रयात्रामात्रस्य पापापादकत्वम् । देशकालविशेषमन्तरैव सर्वथा कलियुगे पतितत्वसंपादकत्वं समुद्रयानस्य ममाभिमतम् ।

(17). समुद्रेऽब्धौ नौयातुः प्रायश्चित्तेन (त्रैवार्षिकप्रायश्चित्तपूर्वक पुनरुपनयनचान्द्रायणरूपप्रायश्चित्तद्वयेन) संग्रहः । ब्राह्मणस्य सर्वत्र षट्कर्माणि भवत्येव । क्षत्रियवैश्ययोः स्वधर्मेण (विजयव्यापाररूपधर्मेण) समुद्रयाने दोषलेशस्याभावेऽपि अन्यार्थं गमने संसर्गप्रायश्चित्तेन (एकचान्द्रायणेन) सर्वत्र संग्रहो भवत्येव ।

जागर्ति च मत्कृता अब्धिनौयानमीमांसापि उक्तार्थे साहाय्यकरणे ।

(24). त्रिदिनावच्छिन्नसमुद्रयानस्य पातित्यापादकत्वात् तत् निषिद्धमेव ।

(26). विलक्षणोद्देश्यानवच्छिन्नं समुद्रयानमात्रं (पापकारि)

(35). विलक्षणदेशानुद्देश्यं समुद्रयात्रामात्रं दुष्यति ।

(41). समुद्रयानमेव पापापूर्वजनकम् । तच्च देशविशेषरूपद्वीपान्तर प्राप्त्यवच्छिन्नं गुरु भवति ।

(51). ब्राह्मणस्य आपद्वृत्तितया विहितं वाणिज्यमवलम्बमानस्य समुद्रयानं दोषापादकम् । त्रीणि दिनानि समुद्रयानन्तु अधिकदोषजनकम् । अन्यथा तु शास्त्रमुदासीनम् ।

II. द्वितीयः प्रश्नः—समुद्रयानेन जायमानस्य दोषस्य प्रायश्चित्तमस्ति ? नवा ?

(क) समुद्रयानेन जायमानस्य दोषस्य प्रायश्चित्तमस्तीति अधो निर्दिष्टा वदन्ति —

3—5—6—7—8—10—11—12—13—14—15—16—17—18—20—21—22—23—24—25—26—27—28—29—33—34—35—36—39—40—41—43—44—46—48—50—51—52—53—54—55—56—59—66—69.

आहत्य पञ्चचत्वारिंशत् (45) पण्डिताः ।

(ख) प्रायश्चित्तमेव नास्तीति त्रयो वदन्ति—30—42—49. इतराभ्यां नात्र प्रत्युत्तरितम् ।

.... ... .... ... .... ... .... ...

III. तृतीयः प्रश्नः—आचरितप्रायश्चित्तस्य स्वार्थेषु नित्यकर्मसु स्वस्य स्वापत्यस्य च विवाहादिषु, शास्त्रागोचरेषु सजग्ध्यादिषु च संव्यवहार्यता अस्ति? नवा ?

(क). आचरितप्रायश्चित्तस्य स्वार्थेषु नित्यकर्मसु, स्वस्य स्वापत्यस्य च विवाहादिषु शास्त्रागोचरेषु सजग्ध्यादिषु च संव्यवहार्यता अस्तीत्यभिप्रयता मङ्काः—

3—5—6—7—13—14—15—16—17—20—22—25—26—27—29—30—40—41—42—44—45—46—51 5354—55—56.

आहत्य सप्तविंशतिः (27) पण्डिताः ।

(ख) उक्तेषु विषयेषु कुत्रापि संव्यवहार्यता नेत्याशयवता मङ्काः—12—35—36—49.

आहत्य चत्वारः (4) पण्डितः ।

(ग) स्वस्य स्वापत्यस्य च विवाहादिसंस्कारान् वर्जयित्वा अन्यत्र संव्यवहार्यता अस्तीति (34) संख्याङ्कितः अभिप्रैति ।

(घ) शास्त्रागोचरं सजग्ध्यादिकं स्वस्य स्वापत्यस्य च संस्कारेषु उपनयनं च विहाय अन्यत्र संव्यवहार्यता अस्तीत्यभिप्रैत्ययम्—39

(ङ) शास्त्रागोचरसजग्ध्यादिकं परित्यज्य अन्यत्र संव्यवहार्यता स्तीत्यभिसन्दधानाना मङ्काः—

52—59—66.

आहत्य त्रयः (3) पण्डिताः।

(च) नित्यकर्मसु दुाहतुः विवाहे च संव्यवहार्यतां संकोचयत्ययम्—

43. ।

(छ) नित्यकर्ममात्रे संव्यवहार्यतां संकोचयन्त्येते—

8—11—18–21—24—28—33—48—50—69.

आहत्य दश (10) पण्डिताः।

(ज) सुतोपनयनविवाहवर्जम् अन्यत्र संव्यवहार्यता मयमनुमन्यते—

23—।

अभिप्रायेविशेषाश्चाधः प्रदर्श्यन्ते—

(3) तस्य स्वार्थकर्मसु योग्यतासत्त्वेऽपि समुद्रयानौपयिकम्लेच्छयवनादिदेशगमनापरिहार्यतदीयसिद्धान्नभोजनादि कृतवतो नैव संव्यवहार्यत्वमिति।

(6) कृतप्रायश्चित्तस्य पुरुषस्य स्वार्थेषु नित्यकर्मसु स्वस्य विवाहे चाधिकारोऽस्ति। पातित्यजनककर्माचरणात्पूर्वमुत्पन्नस्य प्रायश्चित्तानन्तर मुत्पन्नस्य च विवाहो निष्प्रत्यूहः।पातित्यसमये उत्पन्नस्य तस्य यदुक्तं प्रायश्चित्तं तत्करणानन्तरं विवाहः। कृते प्रायश्चित्ते तस्य एकपङ्क्तिभोजनादौ संव्यवहार्यतास्ति।

(5) चीर्णप्रायश्चित्तस्य पुरुषस्य स्वार्थेषु नित्यकर्मसु स्वस्य विवाहे च अधिकारोऽस्ति। तदपत्यं त्रिविधम्—पातित्यप्रयोजककर्माचरणात्पूर्वमुत्पन्नम्, पातित्यदशायामुत्पन्नम्, प्रायश्चित्तानन्तरमुत्पन्नम्—इति। आद्यान्त्ययोः विवाहर्हत्वं निर्विवादम्, मध्यमस्य तदुदितप्रायश्चित्तानन्तर मधिकारः। कृतप्रायश्चित्तस्यैकपङ्क्तिभोजनादौ संव्यवहार्यतास्ति।

(11) प्रायश्चित्तं कृतवतः स्वीयदैवपित्र्यकर्ममात्रेऽधिकारोऽस्ति। ब्राह्मणभोजननिमित्तकार्येषु हेम्ना वा आमेन वा तादृशब्राह्मणै र्वा निर्वहणयित्वम् तत्पुत्रस्य तृतीयांशं प्रायश्चित्तं कृत्वा अन्येन उपनयनादिसंस्कारा निर्वर्तनीयाः। तत्पुत्र्या नवमांशं प्रायश्चित्तं कृत्वा पित्र्यवस्त्रादिकं परित्यज्य अन्यदीयवाससा परिच्छाद्या " नाहमेतेषां, नैतेमदीयाः" इति तिरुच्चै र्वाचयित्वा देवालये विवाहः करणीयः।

(14) अस्ति प्रायश्चित्तानन्तरं जातस्य, यानात्पूर्वं जातस्यच अस्त्येव। पातित्ये जातस्य "पतितोत्पन्नः पतितः" इति न्यायात्, पतितत्वात्, तत्प्रायश्चित्तानन्तरं तस्यापि सर्वमस्त्येव।

(20) स्वार्थेषु नित्यकर्मसु निर्विचारमस्ति। स्वस्य विवाहादिषु च पूर्ववत्। स्वापत्यस्य तु प्रायश्चित्ता त्पूर्वमुत्पन्नस्य प्रायश्चित्तं कारयित्वा ततो विवाहादिषु संव्यवहार्यता संभवति। स्वस्य प्रायश्चित्तानुष्ठानानन्तर मुत्पन्नस्य तु विषये निर्विवादमेव संभवति।

(22) आवश्यकस्वधर्मानुष्ठान मविहाय ब्राह्मण्यावलोपकं निषिद्ध मनाचरन् यःसमुद्रं यायात्, तस्य संव्यवहार्यता वर्तते; तदपत्यस्य तु प्रायश्चित्ताननुष्ठानदशाया मुत्पन्नस्य चीर्णप्रायश्चित्तस्य संव्यवहारार्हता कैमुतिकन्यायसिद्धा। विहाय स्वधर्मानुष्ठानम्, आचरन् ब्राह्मण्यावलोपकं निषिद्धं यः समुद्रयायी, तस्य कृतप्रायश्चित्तस्यापि संव्यवहार्यता नास्ति, स्वकर्मानुष्ठानार्हता मात्र (अस्ति)। तदपत्यस्य प्रायश्चित्ताननुष्ठानदशाया मुत्पन्नस्य अधिकप्रायश्चित्तेन, अनन्तरोत्पन्नस्य अल्पप्रायश्चित्तेन पूतस्य संव्यवहार्यता वर्तते।

(23) चीर्णप्रायश्चित्तस्य पुरुषस्य स्वार्थेषु नित्यकर्मस्वाधिकारोऽस्ति। प्रायश्चित्तं तु बोधायनऋग्विधानोक्तम्। अन्यत्र पुत्रविषये आर्याणामधिकारः, पुत्रिकाविषये तु परस्याधिकारः। शास्त्रागोचरेषु सजग्ध्यादिषु समुद्रयातु रधिकारोनास्ति।

(24) स्वार्थेषु नित्यकर्मसु अधिकारोऽस्ति। अपत्यविवाहादिषु शास्त्रोदितप्रकारेण कर्तव्यत्वमस्ति। अपाङ्क्तेयवर्गे पठितत्वात् सुमुद्रयायिना भोजनादिकं न कार्यम्।

(26) नित्यकर्मस्वधिकारः । न संव्यवहारः । (तत्सुतादेः) संसर्ग-प्रायश्चित्तेन (पतितप्रायश्चित्तेन) शुद्धयो स्तदपत्ययो रन्येन उपनयनं कन्यादानं च ।

(27) चीर्णप्रायश्चित्तस्य पुंसः स्वानुष्ठेयनित्यकर्मसु अधिकारोऽस्त्येव - तदपत्यस्यापि प्रथमं प्रायश्चित्तं यथोक्तं कृत्वैव संस्कारः कर्तव्यः । तेन सह भोजनविषये संव्यवहार्यत्वं तु सिद्धमेव ।

(28) स्वकर्मण्यधिकारो निराबाधः । अवशिष्टं नानुमतम् । सिन्धु-याना त्पूर्वोत्पन्नकुमारसंस्कारे न तस्यास्त्यधिकारः ।

(29) अस्त्येव, किन्तु तदन्यकर्तृकदेवपितृकार्ये न ।

(34) नित्यकर्मानुष्ठानेऽस्याधिकारः । अपतितत्वदशाया मुत्पन्नस्या पत्यस्य दोषो न, पतितस्य कन्यामात्रमपत्यं दोषावहं न भवति, तस्या विवाहस्य प्रकारान्तरेण स्मृतौ कथितत्वात् । कृतप्रायश्चित्तस्य सहजग्धिः रागप्राप्ता ।

(35) कुत्रापि संव्यवहार्यत्वं नास्ति, स्वयं नित्यकर्माण्यनुष्ठातुं शक्नोति; (पतितप्रायश्चित्तेन शुद्धस्य) पुत्रस्योपनयनं पुत्र्या दानं च अन्येन ।

(36) प्रायश्चित्तिरस्ति । तथापि सहभोजनादिसंसर्गार्हता नास्ति । विशेषणविशिष्टसमुद्रयानं न दुष्टम् ।

(39) नित्येष्वधिकारः भार्यापरिग्रहे दोषागमात् प्राक् प्रायश्चित्ता दूर्ध्वमिव मध्यकालोत्पन्नाया अपि कन्याया दानेऽप्यस्त्यधिकारः । पुत्रो पनयने सजग्ध्यादौ च अधिकारं नावधारयामि ।

(40) स्वार्थेषु नित्यकर्मस्वस्त्यधिकारः । सकृद्गन्तुः कृतप्रायश्चित्तस्य अभक्ष्यभक्षणापेयपानादिरहितस्य अस्त्यधिकारः । शास्त्रागोचरेषु सजग्ध्यादिषु पूर्वोक्तविशेषणविशिष्टस्यास्त्यधिकारः । पूर्वोत्पन्नस्यापत्यस्य, प्रायश्चित्तान न्तरजातस्य, अस्त्यधिकारः सजग्ध्यादिषु । अकृतप्रायश्चित्तजस्यापत्यस्य नास्त्यधिकारः ।

(41) नित्यादिकर्मस्वस्त्यधिकारः । स्वस्य विवाहेऽस्त्यधिकारः । अप तितत्वदशाया मुत्पन्न मपत्यं न दुष्यति । पतितत्वदशायामुत्पन्नं स्त्र्यपत्यं न दुष्यति । अन्यत्तु चिन्त्यम् । कृतप्रायश्चित्तो न पतितः । सहजग्धिरस्ति ।

(43) विवाहादिषु वैकल्पिकानित्येषु न संव्यवहार्यता । अन्यत्र नित्येषु तत्कर्तृकेष्वास्ति । तेन कृतप्रायश्चित्तेन स्वव्ययेनानुष्ठीयमानेषु काम्येषु लौकिकेषु च नास्ति। कृतप्रायश्चित्तस्य प्रायश्चित्तानन्तरोत्पन्नापत्यविषये विवाहादिसंव्यवहार्यता अस्ति । अकृतप्रायश्चित्ततादशायाम् उत्पन्नस्यापत्यस्य विवाहादिषु संव्यवहार्यता अस्ति ।

(44) स्वस्य नित्यकर्मसु स्वार्थेषु अधिकारोऽस्ति । पतितावस्थायामुत्पन्नस्य स्वापत्यस्य विवाहादिषु अन्येषा मेव आर्याणामधिकारोऽस्ति । सजग्ध्यादिषु संव्यवहार्यता इतरैः सह वर्तते ।

(46) स्वार्थेषु नित्यकर्मस्वधिकारो वर्तते कृतप्रायश्चित्तस्य । सजग्ध्यादिषु स्वापत्यविवाहेषु संव्यवहार्यता नास्त्येव । शोधितस्यापि इत्यस्य पतितसंसर्गरहितस्य संव्यवहार्यता ।

(51) आचरितप्रायश्चित्तस्य सहभोजनादिषु संव्यवहार्यतास्त्येव पित्र्ये दैवे च परं कर्मणि पूर्वोक्तस्य तस्य अन्येन नियोजनं शास्त्रनिषिद्धम् । तस्य पुत्रस्य पुत्र्याश्च सर्वेष्वपि कर्मसु निर्बाधम् ।

(52) अनुष्ठितप्रायश्चित्तस्य स्वार्थेषु नित्यकर्मसु पुत्रादीनां विवाहादिषु च अधिकारोऽस्ति । सजग्ध्यादिषु अविधिचोदितेषु विधिचोधितेषु च याजनाध्यापनप्रतिग्रहेषु अधिकारो नास्ति ।

(55) कृतप्रायश्चित्तस्य पुरुषस्य तदपत्यस्य च समुद्रयाना त्पूर्वोत्पन्नस्य इतरैः साकं विवाहादियोग्यता अस्त्येव । तदनन्तरोत्पन्नस्यापि इतरैः सह संव्वहार्यता, विवाहादियोग्यता, सजग्ध्यादिषु च योग्यता चिन्त्यैव ।

(56) नेदं समुद्रयानमात्रनिमित्तकं पापं पतनीयत्वप्रयोजकम्, किन्तु असकृत्कृतसमुद्रयाननिमित्तकमेव । समुद्रयाना त्पूर्वमुत्पन्नस्य पापप्राप्तिरेव नास्ति ।

(59) कृतप्रायश्चित्तस्य स्वार्थेषु नित्यकर्मसु अर्हता । समुद्रयानात्पूर्वमुत्पन्नस्य प्रायश्चित्तानन्तरमुत्पन्नस्य च तत्पुत्रस्य विवाहादिषु अर्हता । मित्रैः सहभोजने अर्हता नास्ति ।

(66) चीर्णप्रायश्चित्तस्य सापत्यस्य नित्यकर्मसु विवाहादिषु च संव्यवहार्यता अस्ति । सजग्ध्यादिषु संव्यवहार्यता नास्ति ।

IV. तुरीयः प्रश्नः—पूर्वोक्तं सर्वमपि ब्राह्मणमात्रविषयकंवा ? उत त्रैवर्णिक साधारणम् ?

अत्र

(क) सर्वमेतत पूर्वोक्तं ब्राह्मणमात्रविषयकमित्येतेऽभिप्रयन्ति—
13—14—17—22—25—28—29—30—33—35—36—39—43—44—51—53—55—56.

आहत्य अष्टादश (18) पण्डिताः ।

(ख) पूर्वोक्तं सर्वमपि त्रैवर्णिकसाधारणमित्येते—

3—5—6—7—8—11—12—16—18—20—21—23—24—26—27—34—40—41—42—46—48—49—50—52—54—66—69.

आहत्य सप्तविंशतिः (27) पण्डिताः ।

(ग) पूर्वोक्तं सर्वमपि ब्राह्मणक्षत्रियमात्रविषयमिति अनयोः द्वयो राशयः—
15—59.

इतोऽन्यैस्त्रिभिः नात्र प्रत्युत्तरितम् ।

---

## II. ऋतुमती विवाहः

एप्रिल् मासस्य नवमे दिवसे सायं विवाहविषये संगृहीतानां पारिषद्याशयानां संग्रहेण विवेचनम्—

विवाहविषये आहत्य (50) पञ्चाशतः पण्डिताना माशयाः संगृहीताः ।

I. प्रथमः प्रश्नः—

वेदगतानां लिङ्गानां स्मृतिगतायाः निरपेक्षस्वरुपायाः श्रुतेश्च बलाबलपरीक्षायां किं वैदिकलिङ्गानामेव प्राबल्यं शास्त्रसंमतं भवति ? उत-स्मार्तश्रुतेरेव प्राबल्यम् ? आहोस्वित् वैदिकलिङ्गानां स्मार्तश्रुतेश्च सम-बलत्वम् ?

अत्र

(क) वैदिकलिङ्गानामेव प्राबल्यं शास्त्रसंमतमिति अधोनिर्दिष्ट-संख्याभि रङ्कितानां पण्डिताना माशयः—

7 – 12 – 16 – 22 – 23 – 29 – 36 – 39 – 40 – 41 – 42 – 43 – 46 – 52 – 55 – 56 – 62 – 64 – 67.

आहत्य एकोनविंशतिः, (19) पण्डिताः.

(ख) स्मार्तश्रुतेरेव प्राबल्यमिति अभिप्रयन्तः संख्याङ्करधो निर्दिश्यन्ते—

3 – 8 – 11 - 13 – 15 – 28 – 44 – 48 – 50 – 59 – 69.

आहत्य एकादश (11) पण्डिता. ।

(ग) वैदिकलिङ्गानां स्मार्तश्रुतेश्च समबलत्वं केचिदुशन्ति ; त एते—

1 – 2 – 10 – 14 – 17 – 18 – 25 – 27 – 63 – 68.

आहत्य दश (10) पण्डिताः।

अत्र 22 – 36 – 41 – 46 – 55—एताभिः संख्याभिरङ्कितानाम् आशयः अनतिस्फुटोऽपि स्मार्तश्रुतिबलीयस्त्वकोटिमेव कटाक्षयतीवेति तत्रैते निर्दिष्टाः । 8 – 11 – संख्याभ्यामङ्कितयोराशये "क्वचित्" इति पद मधिकं दृश्यते ।

विवाहविषये स्वाशयमाविष्कर्तुं प्रवृत्तेषु पञ्चाशत्संख्याकेषु पण्डितेषु' निर्दिष्टेभ्य इतरैः प्रथमे प्रश्ने न किमप्युत्तरितम् । संगृहीतेषु च प्रथमप्रश्नस्य प्रत्युत्तरेषु, यत्र विशेषाः समुपलभ्यन्ते, तान्युत्तराण्यधः प्रकाश्यन्ते—

(3) परिहृत्यापवादविषयमुत्सर्गोऽभिनिविशते इति न्यायविषये कुत्रचित् अन्यथात्वेऽपि अनुमितश्रुतिवाक्यमूलतया स्मार्तश्रुतेः प्राबल्यमुचितम् । वैदिकस्यापि लिङ्गस्य आबल्यप्रयोजकस्य अर्थविप्रकर्षस्य हेतोः सद्भावात् ।

(22) श्रौतलिङ्गस्य निरवकाशस्य प्राबल्यम् ।

(23) प्रायः वैदिकलिङ्गानामेव प्राबल्यम् । कुत्रचित् वैदिकलिङ्गस्य सावकाशत्वाच्च श्रुतेः प्राबल्यम् ।

(36) अनन्यथासिद्धवैदिकलिङ्गापेक्षया स्मार्तश्रुतीनां प्राबल्यं नास्ति । अन्यथासिद्धवैदिकलिङ्गापेक्षया तु स्मार्तश्रुतीनां प्रामाण्यमस्त्येव ।

(40) श्रौतलिङ्गस्यापौरुषेयगतत्वेन उपजीव्यत्वेन अनन्यथासिद्धत्वेन उपजीवकस्मार्तश्रुत्यपेक्षया प्राबल्यम् ।

(41) वैदिकलिङ्गानि स्मृत्यपेक्षया स्वतः प्रबलानि । किंतु स्मार्त्यापि विनियोजकश्रुत्या विरोधे लिङ्गं वैदिकं दुर्बलं भवति ।

(46) निरवकाशस्य श्रौतलिङ्गस्य प्राबल्यम् । सावकाशं चेत् स्मार्तविधेः प्राबल्यम् ।

(55) श्रौतलिङ्गस्य स्मार्तनिरवकाशश्रुत्यपेक्षया प्राबल्यमङ्गीक्रियते मीमांसकैः । तन्त्रवार्तिकग्रन्थे एतत्प्रतिपादकप्रकरणमात्रं दृष्टं मया । अथापि निरवकाशायाः स्मार्तश्रुतेः क्वचित्प्राबल्यमङ्गीकरणीयम् ; अन्यथा निरवकाशन्यायस्य वैयर्थ्यं स्यात् । अतः किं वाच्यम् ? समानयोरेव श्रौतलिङ्गस्मार्तश्रुत्योः बलाबलविचारे श्रौतलिङ्गस्य प्राबल्य मभ्युपगन्तव्यम् !

(64) वैदिकलिङ्गानामेव प्राबल्यम् । श्रुत्यनुरोधेनैव स्मृतेः प्रामाण्यम् , श्रुतिविरुद्धस्मृतिः अप्रामाणिकी ।

(50) स्मार्तश्रुत्यनुसारेण प्रौढाविवाहनिषेधवचनानुसारेण श्रौतलिङ्गानां दौर्बल्यमेव कल्पनीयमिति प्रतिभाति ।

(8) स्मार्तश्रुतेरपि प्राबल्यम् ।

(11) क्वचित् स्मार्तश्रुते रपि प्राबल्यमस्ति ।

(18) क्वचित् वैदिकलिङ्गानां क्वचित् निरपेक्षस्वरूपायाः श्रुतेः प्राबल्यदौर्बल्ये स्मार्तश्रुतेः समबलत्वम् ।

II. द्वितीयः प्रश्नः—

गृह्यसूत्राणा मेव पर्यालोचनया किं संभोगार्थसहशयनापरपर्यायस्य समावेशनस्य विवाहाङ्गतया विवाहितत्वमङ्गीकर्तव्यं भवति? अथ न?

(क) गृह्यसूत्रमात्रपर्यालोचनया संभोगार्थसहशयनापरपर्यायस्य समावेशनस्य विवाहाङ्गतया विहितत्व मङ्गीकर्तव्यं भवति इत्यभिप्रयतां पण्डिताना मङ्का अधो निर्दिश्यन्ते—

5—6—7—14—16—17—20—25—28—29—40-41—42—43—45—49—52—55—56—59—63—64—66—67—68.

आहत्य पञ्चविंशतिः (25) पण्डिताः ।

(ख) समावेशनस्य विवाहाङ्गत्वं नाङ्गीकर्तव्यं भवति इत्यभिप्रयतामङ्काः—

1—2—3—8—11—12—13—15—18—22—23-27—36—39—44—46—50—62—69.

आहत्य एकोनविंशतिः (19) पण्डिताः ।

निर्दिष्टेभ्य इतरैः द्वितीये प्रश्ने न किमप्युत्तरितम् । अत्र च यत्र विशेषाः समुपलभ्यन्ते, तान्युत्तराण्यधः प्रकाश्यन्ते—

(28) गृह्यसूत्रेविभिन्नकालिकत्वस्य सिद्धत्वेन अङ्गत्वेऽपि सावकाशत्वम्॥

(36) विवाहानन्तरं चतुर्थदिवसे समावेशनमन्त्रजपादिकं कर्तव्यमिति नियमो नास्ति ।

(40) कल्पसूत्रपर्यालोचनया सहशयनस्य प्रकरणादङ्गत्वमवश्यमङ्गी कर्तव्यमेव । यद्यपि अङ्गत्वबोधकविधि र्न दृश्यते, तथापि कर्तव्यपद मध्याहृत्य पूरणीयम् ।

(41) समावेशनं सति संभवे विवाहाङ्गमेव ।

(46)शेषान्तो विवाहः, समावेशनन्त्वन्यत ।

(59) केषां चित् गृह्याणां पर्यालोचनया अङ्गी कर्तव्यम् ।

(3) गृह्यकारै रपि सप्तमे पदे भार्यात्वसम्पत्तेरुपपादितत्वेन तावतैव च विवाहस्य वृत्ततया उपवेशनस्य न नियतं विवाहाङ्गत्वम् ।

(5) समावेशनाङ्गीकर्तॄणां मते विवाहाङ्गत्वम् । अन्येषां मते नास्ति ।

(12) संभोगार्थसहशयनापरपर्यायस्य समावेशनस्य विवाहपञ्चमदिवसकर्तव्यतया विवाहस्य शेषहोमान्तस्वरूपतया तस्य समावेशनस्य विवाहाङ्गत्वं नास्त्येवेति ।

(15) समावेशनस्य गर्भाधानस्थानीयतया विवाहानङ्गत्वमेव, विवाहस्य सप्तपदीपर्यन्ततया तस्य समावेशनात्पूर्वमेव निष्पन्नत्वात् ।

(22) समावेशनस्य विवाहाङ्गत्वमेव नाभिमतमस्माकम्। वैवाहिकब्रह्मचर्यानुपदमेव समावेशनस्य मुख्यकालताप्रतीत्या विहितसमावेशनकानामापस्तंबादीना मासन्नार्तवाविहस्य मुख्यत्वं प्रतीयते । विवाहतुरीयदिनादा ऋतुसमावेशनसंभवे संभोगार्थसहशयनमेव समावेशनम्, अनृतुसमावेशने औपचारिकं समावेशनपदम् ।

III. तृतीयः प्रश्नः—

धर्मशास्त्रे—किमिदानीन्तनीनामपि प्रौढानां ब्राह्मणकन्यकानां विवाहस्य विधिः दृश्यते ? उत तादृशीनां कन्यकानां रजोदर्शनानन्तरं वर्षत्रयपर्यन्तं विवाहस्य अभ्यनुज्ञामात्रं दृश्यते ?

अत्र

(क) इदानीन्तनीनामपि प्रौढानां ब्राह्मणकन्यकानां विवाहस्य विधिः धर्मशास्त्रेषु दृश्यते इत्यभिप्रयता मङ्काः—

1—2—29—39—42—45—56—67,

आहत्य अष्टौ (8) पण्डिताः ।

(ख) तादृशीनां कन्यकानां रजोदर्शनातन्तरं वर्षत्रयपर्यन्तं विवाहस्य अभ्यनुज्ञामात्रं दृश्यते इत्यभिसन्दधानाना मङ्काः—

5—6—12—13—20—22—25—27—28—36—40 41—43—50—51—52—59—63—65—66—68.

आहत्य एकविंशतिः (21) पण्डिताः।

(ग) तादृशस्य विवाहस्य क्वचिदभ्यनुज्ञा, क्वचिद्विधिरिति —7—17—इत्यङ्कितयो र्द्वयो राशयः ।

(घ) तादृशस्य विवाहस्य अभ्यनुज्ञानमापद्येव इत्याशय एतेषाम्—

6—14—15—16—23—44 46—62—69

आहत्य नव (9) पण्डिताः ।

(ङ) अभ्यनुज्ञातोऽपि तादृशो विवाहः शिष्टै रनाचरितत्वात् निषिद्ध इति सकम्पं वदता मङ्काः—

18—33—49.

आहत्य त्रयः (3) पण्डिताः ।

(च) सर्वथा तादृशस्य विवाहस्य निषेध एवेत्याग्रृह्णता मङ्काः—

3—8—11—30—55—58—64.

आहत्य सप्त (7) पण्डिताः ।

अत्रापि यत्र विशेषाः, तान्युत्तराण्यधः प्रकाश्यन्ते—

(3) यद्यपि प्रौढापदमस्मिन् प्रश्नेऽनिरुक्तार्थम् , तथापि द्वादशाधिकवयसां ब्राह्मणकन्यानां विवाहविधे र्धर्मशास्त्रेष्वनुपलम्भात् प्राप्तार्तवानां च तासां गर्हणाप्रतीतेः प्रागेवर्तोः कन्यादानमनुमनुते शास्त्रम् ।

(7) धर्मशास्त्रेषु केषुचित प्रौढाविवाहाभ्यनुज्ञानं केषु चित् विधिरिति प्रतीयते ।

(15) प्रौढानां विवाहविधिः लिङ्लोट्तव्यप्रत्ययरूपो न दृश्यते, अत्यन्तापत्कालसंबन्धितया अविवक्षितत्वम् ।

(16) इदानीन्तनस्मृत्यर्थपर्यालोचने निषेध एव, आपदि अभ्यनुज्ञा ।

(17) अभ्यनुज्ञा क्वचित्, क्वचित् विधिश्च दृश्यते ।

(18) रजोदर्शनानन्तर वर्षत्रयपर्यन्त मभ्यनुज्ञामात्रं दृश्यते । रजोदर्शनानन्तरकालिकविवाहस्य निषिद्धत्वात् तथा शिष्टाचाराभावाच्च ऋतुमतीविवाहो नोचित इति मे प्रतिभाति ।

(22) पुष्पवतीनां ब्रह्मणकन्यकानां "त्रीणि वर्षाण्यृतुमती कांक्षेत पितृशासनम्" इत्यादिन्यायेन रजोदर्शनानन्तरकालपर्यन्त मभ्यनुज्ञामात्रस्य सत्त्वेऽपि शिष्टाचारसहकृत "प्रदानं प्रागृतोः" इत्यादिशास्त्रेण ऋतुप्राक्कालिकाविधिरेव, तावच्च मुख्यकाल इति ।

(23) दात्राद्यभावे आपत्कल्पत्वेनाभ्यनुज्ञामात्रम् ।

(32) प्रौढाविवाहस्य धर्म्यत्वमपि चिन्त्यम्।तथापि संग्रहस्तु "अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्नतु" = धर्म्यमपि लोकविद्विष्टं नाचरेदित्यर्थः । तथा च ऋतुमतीविवाहस्य एतावता कालेन अदर्शनात् लोकविद्विष्टत्वात् नैवानुष्ठेयता ।

(40) रजोदर्शनानन्तरं विवाहे विधिर्न, किंतु अभ्यनुज्ञामात्रम् ।

(41) दृष्टरजसां द्विजकन्यकानां यावद्वर्षत्रयं दानपूर्वकं विवाहकाल इत्यभ्यनुज्ञायते ।

(44) धर्मशास्त्रे इदानीन्तनीनां प्रौढानां ब्राह्मणकन्यकानां रजोदर्शनानन्तरं प्रायश्चित्तपूर्वकं आपत्कल्पतया अभ्यनुज्ञामात्रं क्रियते ।

(49) गृह्यसूत्रकारा ऋतुमतीविवाह मनुमन्यन्त इव प्रतिभान्ति । एवं निर्णयसिन्धुरपि आपत्कल्पतया अनुमन्यत इव प्रतिभाति । परतु निबन्धनकारस्य सूत्रकाराणां च अनुमत इव भासमानोऽपि ऋतुमतीविवाहः सर्वैरपि शिष्टैः परित्यक्त इति अनुष्ठानानर्ह एवेति प्रातिभाति ।

(55) प्रौढाविवाहस्य धर्मशास्त्रे विधि र्नास्तीति मदाशयः । रजोदर्शनानन्तरं वर्षत्रयपर्यन्तवचनं युगान्तरविषयम् ।

(51—65) सप्तमवर्षात्पूर्वं विवाहो न कार्यः । प्रतिज्ञाविषये तु ततः पूर्वमपि कार्य एव; अष्टमाद्दशमान्तकालकरणीयो विवाहस्तु काम्यः; दश-

मादूर्ध्वम् आरजोदर्शनात् विवाहो मुख्यः; रजसः परस्तात् वर्षत्रयंतु गौणः कालः। रजसः परं चतुर्थे वर्षे कन्यया स्वयंवरः कार्यः।

(59) गुणवद्वरलाभेऽभ्यनुज्ञायते।

(66) गौणकालादृते ऋतोरनन्तरकाले प्रौढायाः उद्वाहः सप्रायश्चित्त-मनुष्ठेयतया शास्त्रसंमतः।

(69) धर्मशास्त्रे कुत्रापि प्रौढानां इदानीन्तनीनां ब्राह्मणकन्यकानां विवाहविषये विधिर्न दृश्यते।परंतु अत्यन्तापत्समये कथंचित् अभ्यनुज्ञायते।

---

## III. मतान्तरविषयः

एप्रिल् मासस्य दशमे दिवसे प्रातः अस्मिन् विषये सङ्कलितानां पारिषद्याशयानां संग्रहेण विवेचनम्।

अत्र विषये आहत्य सप्तत्रिंशतः (37) पण्डितानाम् आशया गृहीताः

1. प्रथमः प्रश्नः —

वैदिकमतादवैदिकं मतं प्रविष्टानां पश्चात् सनिर्वेदं वैदिकमतमेव पुनराश्रयितु मिच्छतां वैदिकमते पुनः प्रवेशोऽनुमन्तुं शक्यते वा? नवा?

(क) अवैदिकं मतं प्रविष्टानां वैदिकमते पुनः प्रवेशोऽनुमन्तुं युज्यते इत्यभिप्रयता मङ्काः—

7—8—10—13—14—15—17—18—20—21 22—23—24—25—27—28 –29—30—36—39—40—41—42—52—55—56—59 – 63—69—71.

आहत्य त्रिंशत् (30) पण्डिताः।

(ख( पुनः प्रवेशः नानुमन्तुं युज्यत इत्याशयवता मङ्काः—

11—12—50—57.

आहत्य चत्वारः (4) पण्डिताः

इतोऽन्य स्त्रिभिः नोत्तरितम्।

II, द्वितीयः प्रश्नः—

युज्यते चेत्, तस्य पूर्वं तेन परित्यक्तमतजातिस्थैः सह संव्यवहार्यताप्रयोजकं प्रायश्चित्तं किमपि संभवति? नवा?

(क) पूर्वं तेन परित्यक्तमतजातिस्थैः सह संव्यहार्यताप्रयोजकं प्रायश्चित्तं संभवति इत्याशयवतामङ्काः—

10—13—14—17—22—23—25—30—39—55-—56—63.

आहत्य द्वादश (12) पण्डिताः।

(ख) तादृशप्रायश्चित्तं न भवतीति अभिप्रयता मङ्काः—

8—11—12—15—21—27—29—43—57—59—69.

आहत्य एकादश (11) पण्डिताः।

(ग) बालानामेव प्रायश्चित्तेन पुनःप्रवेशादिकम् अनुमन्यतेद्वाभ्याम्। 40—42.

(घ) कालतारतम्यानुरोधेन प्रायश्चित्तादिकमनुमन्यते द्वाभ्याम्—20 52.

(ङ) मतएवप्रवेशमनुमन्यन्ते एते पञ्च—18—24—28—36-—71.

(च) कामकृतस्यमतान्तर प्रवेशस्य न निष्कृतिः संभवतीत्येष मन्यते-46,

इतोऽन्यैश्चतुर्भिः नोत्तारितम्।

The Brahmavadin Press, Madras.

ॐ

काश्च्यां

# पण्डितपरिषद्वृत्तान्तः.

आर्यमतानुयायिनां धर्मव्यवस्थाप्रकारान् समालोचयितुं धर्ममर्मज्ञानां पण्डितानां परिषत् कापि समेषां पण्डितानां बहुमानास्पदे काञ्चीनगरे प्रवर्तनीयेति,प्राचां शिष्टाना मनुशासन माचरणं च अनुरुध्य निरणैषुः केचित् प्रतिवादिभयङ्कर— श्रीमदनन्ताचार्यप्रभृतयः काञ्चीस्थाः पण्डितवर्याः । तदनुगुणं व्यवसाय मवलम्बमानै रेतैः स्वीयव्यवसाये साहाय्यार्थं मद्रपुरी मागत्य पण्डितपक्षपातिनो लोकहितैषिणः डाक्टर्. सर्. स. सुब्रह्मण्यार्यप्रभृतयः केचिन्महाशयाः प्रार्थ्यन्त। आत्मानम् अनतिसन्धाय,भारतीयसमाजस्य वस्तुतत्वं चानपह्नुत्य, कालदेशानुरोधेन भारतीयान् आचारान् परिष्कृत्य लोकहितं सम्पादयितुं बद्धादरो न कोऽपि,पण्डितशक्तेः स्थायितां शास्त्रतत्त्वस्य अनतिक्रमणीयताम् आचारपरिष्करणसम्प्रतिपत्तेःपण्डितमुखनिरीक्षकतां च सर्वथा अनादृत्य, स्वैरं प्रवर्तितुम्, तथा प्रवृत्तावभिमतं फलमधिगन्तुं वा प्रभवेत्—इत्येवं सुदृढमभिसन्दधानाः डाक्टर्. सर्. स. सुब्रह्मण्यार्यप्रभृतयो महोदयाः आचारपरिष्कारपद्धतेः समीकरणस्य, धर्मादन्यत्राभिनिवेशं विहाय धर्मरहस्यं विचार्य लोकहिताचरणे पण्डितगोष्ठ्याः प्रवर्तनेन समुन्नमनस्य च समुचितोऽयमवसरः सम्प्राप्तः सर्वथा नोपेक्षणीय इति काञ्चीपण्डितानां व्यवसायं सामोदमभिनन्द्य परिषन्मेलने द्रव्येण अन्यथा च साहाय्याचरणं प्रत्यशृण्वन् । डाक्टर्. सर्. स. सुब्रह्मण्यार्यमहाशयानां गृहे परिषत्सम्बन्धिनो विषयान् समालोचयितुं प्रवर्तितायां

कस्यांचित् सभायां परिषदितिकर्तव्यतानुबन्धिनः केचिद्विषयाः संसूचिताः । तत्र च सभायां अधोनिर्दिष्टा महाशयाः सन्निहिता अभवन्—

1 डाक्टर्. सर्. स. सब्रह्मण्यार्यः.

2 आणरेबिल्. पी. आर्. सुन्दरार्यः.

3 आणरेबिल्. पी. एस्. शिवस्वाम्यार्यः.

4 सर्. वी. सी. देशिकाचार्यः.

5 दिवान् बहदूर्. के. कृष्णस्वामिराव्.

6 राव् बहदूर्. म. रङ्गाचार्यः.

7 दिवान् बहदूर्. ल. ए. गोविन्दराघवार्यः.

8 टि. आर्. रामचन्द्रार्यः.

9 महामहोपाध्यायाः—चन्द्रशेखर शास्त्रिणः.

10 विद्वान्. टि. लक्ष्मणाचार्यः.

11 विद्वान्. पि. वि. अनन्ताचार्यः.

12 विद्वान्. स. श्रीशैलताताचार्यः

13 विद्वान्. आल्वार अय्यङ्गार्.

14 विद्वान्. म. कुमारताताचार्यः.

2. ततोऽतीते जनवरिमासस्य विंशे दिवसे काञ्चीस्थानां पण्डितानाम् अन्येषां महाशयानां च काचन सभा सममिलत्, परिषन्मेलनं च अधोनिर्दिष्टविषयाणां विचारार्थम् अवश्यं कर्तव्यमिति निरचैषीत्—

1 संस्कृतभाषाभिवृद्ध्युपायाः.

2 समुद्रयात्रा.

3 मतान्तरं प्रविष्टानां पुनः संग्रहः.

4 वध्वा वरस्य च विवाहयोग्यं वयः.

5 केचन वैदिकाचाराः

6 राजकीयधर्मसम्बन्धिशासनेषु आवश्यकानि संस्करणानि.

7 पण्डितानामैकमत्यम्.

अन्येचावश्यकतया समये प्रस्तोष्यमाणाः विषयाः.

3. ततोऽतीते फिब्रवरिमासे मद्रपुरीयैः कैश्चित् काञ्चीपुरीयैश्च परिषन्निर्वाहकसमिते रङ्गभूतैः परिषदितिकर्तव्यतया समुद्दिष्टानां विषयविशेषाणां सूचिका काचन पत्रिका बहिरवतारिता। प्रथमतो निर्द्धारितानां परिषत्कृत्यसम्बन्धिनां नियमविशेषाणां सप्रपञ्चम् अत्र व्याख्यानं नातिप्रयोजनकमिति मन्यामहे, अनुपदमेव हि स्फुटी भविष्यति—यत् बहुधा तेषां नियमानां विपरिवर्तने हेतुः समजायत—इति।

एतेषां नियमानां संग्रहः—

(1) निर्वाहकसमित्या परिषदर्थं निमन्त्रितेषु पण्डितेषु पारिषद्याः विचारसौकर्यार्थं षट्त्रिंशत्संख्यां नातिवर्तेरन्।

(2) राव् बहदूर्. म. रङ्गाचार्यमहाशयाः सभानाथपदे विचारितविषयाणां निर्णयप्रकाशने च अधिकृताः भवेयुः।

(3) आङ्गलभाषाभिज्ञैश्च कैश्चित् सभाकृत्यस्य सामीचीन्यमाधातुं परिषदि सन्निहितैः भाव्यम्।

(4) सभायां निर्णीता विषयाश्च समुचितप्रमाणयुक्त्यादिभिः अभिप्रायभेदैश्च सह प्रकाश्येरन्।

4. एवं स्थिते, यत्तोऽयं परिषन्मेलनार्थमाधीयमानः न रोचेत बहुभ्यः काञ्चीपुरीयेभ्यः—इति शङ्कामुपजनयन् कश्चन प्रवादः मद्रपुरीयाणां निर्वाहकाणामन्तिकं काञ्चीत उपस्थापितः कमपि कालं मद्रपुरीयान् परिषद्विषये त्यक्तहस्तानिव अकार्षीत्। निर्वाहकसमितेः कार्यदर्शिभिः रा. स्वामिनाथार्यमहाशयैश्च काञ्चीं गत्वा तत्रत्यानां प्रवृत्तिं सम्यक् विचार्य प्रतिनिवृत्तैः तत्त्वमावेदिता मद्रपुरीयनिर्वाहकसमितिः उचितमवधानं पुरस्कृत्य परिषन्निर्वाहार्थेषु कृत्येषु पुनः प्रावर्तत ततः परम् उपस्थापनीयपण्डितानां निर्णये निमन्त्रणपत्रप्रेषणे

अन्यत्र च सर्वमपि कर्तव्यजातं प्रायेण मद्रपुरीयनिर्वाहकसमितावेव आयतत; आवश्यकपत्रलेखनादिकं च कृत्यजातं मद्रपुरीयनिर्वाहकसमितेः कार्यदर्शिभिरेवाकारि। काञ्चीदेवाधिराजदिव्यालयस्थे आरामे सभामण्डपस्य निर्माणं संस्कृतभाषामयाणां निमन्त्रणपत्राणां पण्डितेभ्यः प्रेषणं च परं काञ्चीपुरीयैर्निर्वर्तितमभूत्। मद्रपुरीयकार्यदर्शिनश्च परिषदारम्भस्य सप्ताहात्पूर्वमेव कर्तव्यजातस्य सम्यगवेक्षणार्थं काञ्चीनगरे सन्निहिता अवर्तन्त।

5. अद्यत्वे शास्त्रान्तरग्रन्थानिव धर्मशास्त्रग्रन्थानपि विशिष्य परिशीलयन्तः पण्डिता विरलाः। प्रायेण धर्मशास्त्रपरिज्ञानं च विद्यमानानामेव केषांचिदाचाराणामुपष्टम्भकेषु केषुचिदेव स्मृतिभागेषु वाक्यखण्डेषु वा पर्यवस्यति। परिषन्मेलनस्य तु मुख्यमिदं प्रयोजनमभिसंहितम् — यत् विद्यमानाः केचिदाचाराः शास्त्रतात्पर्यमनतिलंघ्यैव कियदवधि विपरिवर्तनं सहेरन् इत्यस्य विषयस्य निर्द्धारणं नाम। तदिदं प्रयोजनं परिषदर्थमागतानां पण्डितानां विचाराय प्रस्तोष्यमाणेषु विषयेषु तत्र संभाव्यमानेषु विप्रतिपत्तिबीजेषु तदनुबन्धिषु शास्त्रप्रमेयेषु च विशिष्य परिचयं विना न साधयितुं शक्येत। एतत्सर्वमभिसन्दधाना कार्यनिर्वाहकसमितिः परस्परमाशयभेदानामावेदनस्य तत्तद्विषयकप्रमाणविशेषाणां विशिष्य परिशीलनस्य च अवकाशः संपादनीय एव पण्डितानामिति, तान् परिषन्मेलनदिनात् कतिपयेभ्यो दिवसेभ्यः पूर्वमेव काञ्च्यां सन्निधानाय प्रार्थयत। पण्डिताश्च बहवोऽभ्यर्थनामेनामनुरुध्य आगताः एप्रिल्मासीयप्रथमदिनात्प्रभृति आपरिषदारम्भम् चतुरो दिवसान् परिषत्पूर्वाङ्गभूते विषयवैशद्यार्थेऽस्मिन् विचारे बद्धादरा आसन्। एवं विचारे प्रवृत्तेषु पण्डितेषु पारिषद्यतया गणनीयाः त्रिंशत्संख्याकाः पण्डिताः निर्द्धारणीया इत्यपि निर्वाहकाणाम् अभिसन्धिरासीत्। तथापि महीशूरपुरीतः आगतेषु पण्डितेषु कस्यचित् एकस्य पण्डितस्य द्वयोर्वा आचारपरिष्करणार्थं परिषन्मेलनस्य आरम्भणीयतायामेव विप्रतिपत्त्या अप्रकृताक्षेपाणामुद्भावनेन च कालयापने परं मतिरासीत्। अतः द्विजकन्यकानां विवाह-

योग्यं वयः—इत्यमुमेकमेव विषयमधिकृत्य पूर्वाङ्गभूतमेनं विचारं प्रवर्तयितुं अलमासीदवसरः।

6. (5-4-1912) एप्रिल्मासस्य पञ्चमे दिवसे प्रातः दशमहोरायां काञ्चीदेवाधिराजदिव्यालयस्थस्य ध्वनिकोत्सवमण्डपस्य पुरतो निर्मिते सभामण्डपे ईश्वरप्रार्थनशान्त्यनुवाचनपुरस्सरं परिषन्मेलनमुपक्रान्तम्। महीशूरराजधानीतः जाम्नगरात् विजयनगरात् चिदम्बरक्षेत्रात् मधुरापुरीतः पञ्चनदक्षेत्रात् कुम्भघोणनगरात् मद्रपुरीतः अन्यतश्च, बहवः पण्डितवराः परिषदर्थं समागताः, नानाभागेभ्य आगता बहवः प्रेक्षकाश्च सभामण्डपे समवेता आसन्। पर्यवसिते च सभायाः प्रारम्भकृत्ये डाक्टर् सर् स. सुब्रह्मण्यार्यमहाशयाः आङ्गलभाषया विलिखितं स्वीयमारम्भोपन्यासम् अवातीतरन्; अन्ववदंश्च तदीयं सारं द्राविडभाषया। ततः सभा व्यरंसीत्।

तस्मिन्नेव दिने मध्याह्नात्परं निर्वाहकसमितिः समामिलत्। तत्रच विचारणीयविषयेषु पृथगेकैकं प्रस्तुत्य समेषां विदुषा मुपन्यासोऽधिकं समयमपेक्षेत, अनुगुणं च प्रयोजनं नावहेत्—इत्यभिसन्धाय, केचिदेव पण्डिता विशिष्य पारिषद्यतया निर्द्धारिताः। अथ समाप्तेऽस्मिन् निर्वाहकमेलने, सायं सभामण्डपे परिषन्मेलनमन्वबध्यत। तदात्वेच प्रतिवादिभयङ्करानन्ताचार्यस्वामिभिः संग्रहेण पण्डितेभ्यः स्वागतमभाषि। अनन्तरं सभानाथाः राव्-बहदूर् म-रङ्गाचार्यमहाशयाः परिषत्तत्त्वावेदकं स्वीयमुपन्यासमपठन्। तत्र च उपन्यासे आस्तिकसमादृतं पन्थानमनुल्लङ्घ्य परिषदः आवश्यकता, प्रकारः, अधिकारश्च सर्वेषां हृदयङ्गमेन प्रकारेण सम्यक् प्रतिपादिताः। श्रोतृप्रार्थनामनुरुध्य उपन्यासोऽयं द्राविडभाषयाचान्ववादि। ततः अग्रासनाधिपतीनामादेशमनुसृत्य पारिषद्यानां नामानि सभाया नियमांश्च प्राकाशयन् उपाग्रासनाधिपतयः स. कुप्पुस्वामिशास्त्रिणः।

1. तत्र चैकोऽयं नियमः—

प्रथमं कंचित्पक्षमवलम्ब्य उपन्यस्यतः पञ्चविंशतिर्निमेषाः समयः, ततः तमेव पक्षं समर्थयतां पञ्च पञ्च निमेषाः भाषणसमयः।

अथ तद्विपरीतं पक्षमवलम्ब्य भाषमाणस्य पञ्चविंशतिः निमेषाः समयः, ततस्तमेव पक्षं समर्थयतां पञ्च पञ्च निमेषाः समयः ।

2. अपरोऽयं नियमः —

सर्वानपि विषयानधिकृत्य यथोचितं भाषणे सर्वेषामपि पारिषद्यानामधिकारोऽस्ति, तेषामभिप्रायाः संगृह्येरन् ।

अन्ये तु ये केचित्पण्डिताः यद्युपन्यसितुमभिलषन्ति, तदा सति सौकर्येऽवकाशेच, तेषामपि अनुमतिमग्रासनाधिपतिः दास्यति—इति ।

एवं नियमेषु पारिषद्यनामसुच पठितेषु सभा व्यसृज्यत । केचिदमन्यन्त सुधियः पारिषद्येषु स्वापरिगणनमवमानकरमिति ; अपरे च वादकुतूहलिनः कतिचित् मध्यस्थं कमपि पुरस्कृत्य वाद एव प्रवर्तनीय इति निर्दिष्टां रीतिं नान्वमोदन्त ; अन्ये च नासहन्त कालपरिच्छेदम्;एवं बहुधा भिन्नाशयाः केचित् पण्डिताः संभूय तं तम् अर्थम् अग्रासनाधिपतिम् अन्वयुञ्जत, व्युत्क्रममुच्चैर्भाषणं चावर्द्धत । अकाण्ड एव क्रुद्धानामेतेषां पण्डितानां समाधानाय केचित् प्रायतन्त । एव मतिक्रामति समये सर्वेऽपि स्वंस्वमावासमभजन् ।

**7.** (6-4-1912) द्वितीयदिने प्रातः निर्वाहकसभास्ताराः पण्डिताश्च पूर्वेद्युः सञ्जातस्य पण्डितानां क्षोभस्य तात्त्विकं बीजमवगत्य यथाशक्ति परिहर्तुं नियमविशेषांश्च समालोचयितुं कार्यालये सममिलन् । आधुनिकीं विषयविचाररीतिं परित्यज्य वादरीतेः समादरणेन निमन्त्रितानां सर्वेषामविशेषं पारिषद्यकोटौ गणनेन च—विमनीभूताः केचित् पण्डिताः स्वास्थ्यमापाद्येरन् इति,तत्र सभायां कैश्चित् निरूपितम् । अन्ततश्च, यथा परिषन्मेलनं विफलं न भवेत् , यथा च परिमितेऽवकाशे उपयुक्तं किञ्चित् कर्म निर्वर्त्येत, तथैव प्रयतितव्यम् —इत्यभिसन्धाय,प्रायेण अद्यत्वे जल्पस्य वितण्डायावा कोटिमवगाहते वादरीतिः,तया च तत्त्वनिर्णयो महान्तं समयमपेक्षते, अतः आधुनिकविचाररीतिरेव समादर्तुं साम्प्रतम् —इति सम्यक् निरूप्य, सभानाथाः निमन्त्रितानां सर्वेषां पारिषद्येष्वन्तर्भावम् , निर्दिष्टनियमा-

नुसृत्य तेषामुपन्यासस्यावसरम्, त्रयाणां पण्डितानाम् आत्मनः सहायतया नियमनं च अभ्युपागमन् ।

8. तस्मिन्नेव दिने मध्याह्नात्परं मिलितायां महासभायां निमन्त्रितेषु पण्डितेषु पारिषद्यासनमध्यासीनेषु प्रथमं संस्कृतभाषाभिवृद्धिरूपो विषयः विचारपदवीमध्यरुक्षत् । विषयेऽत्र अधोनिर्दिष्टपण्डिता उपन्यास्थन्—

1 दण्डपाणिदीक्षिताः—मनोहर उपन्यासः.

2 रा. च. वि. कृष्णमाचार्याः—

(a) उपकारकृते राजकीयाः प्रतीक्षणीयाः ।

(b) अधिकरणादिषु पण्डितानां प्रवेशः संपादनीयः ।

3. वेङ्कटाचलशास्त्रिणः—

(a) स्त्रीविद्याभ्यसनम्,

(b) ग्रन्थान्तराणां विपरिवर्तनम्,

(c) रूढपदनिर्माणम्,

(d) सर्वेषां शास्त्राणां सामान्यज्ञानसंपादनम्—

इत्येतान्यावश्यकानि ।

4. शेषाद्याचार्याः—

(a) प्रसिद्धभाषया सहाध्ययनम्,

(b) स्त्रीविद्याभ्यसनम्—

इत्येते आवश्यके ।

5. नटेश शास्त्रिणः—

(a) स्त्रीविद्याभ्यास आवश्यकः ।

(b) भाषान्तरं नावश्यकम् ।

6. गुण्ड शास्त्रिणः—

पण्डितानां बिरुददानेन प्रोत्साहन मावश्यकम् ।

7. दोड्डबेल नारायण शर्माणः—

आङ्गल भाषायां सामान्यज्ञान मावश्यकम् ।

8. नरसिंह शास्त्रिणः—

9. रामनाथ शास्त्रिणः—( काञ्चीपुरे पच्चयप्प विद्यालय पण्डितः )

अनन्तरम्—देहलीनगरे मकुटधारणमहोत्सवं निर्वर्त्य निवर्तमानैः महनीयचरितैः महामहिमशालिभि रस्मत्सार्वभौमैः कालिघट्टनगरे प्रकाशितम् अस्मत्प्राचीनविद्याभिवृद्ध्यनुकूलं तेषां उदारमाशयम्, महामहोपाध्यायादि बिरुदाङ्कितानां पण्डितवर्याणां सादरं तैः कल्पितां वार्षिकीं सम्भावनां च, सहर्षमुपलभ्य, महानुभावेष्वस्मच्चक्रवर्तिषु सर्वथास्माकं कृतज्ञता प्रकाश्यते ।

निर्दिष्टः चक्रवर्तिमहाशयानामाशयः यथा शीघ्रमेव फलेग्रहिर्भवेत्, यथा च संस्कृतभाषायाः समुन्नतिः सर्वथा संजायेत, मद्रविभागविश्वविद्यालयस्य भागतया भारतवर्षराजकीयैः निर्दिष्टे सार्द्धलक्षचतुष्टयपरिमिते धने यथोचितं लक्षान्न्यूनो भागः यथा वा संस्कृतविद्याभिवृद्ध्यर्थं विनियुज्येत, तथा समुचिता उपाया अचिरेणैवादरणीयाः इति मद्रमण्डलशासकाः मद्रमण्डलीयविश्वविद्यालयनिर्वाहकसमितिश्च सादरं सप्रश्रयं च अभ्यर्थ्यन्ते—

इति इमौ विषयौ प्रतिवादिभयङ्करानन्ताचार्यैः प्रस्तुतौ, तिरुप्पतिदेशिकाचार्यैरनुमोदितौ सर्वैरपि साध्यक्षैः सभास्तारैरङ्गयकारिषाताम् ।

अनन्तरम् अर्द्धहोरासमयं विश्रम्य सार्द्धतृतीयहोरायां सभा समन्वारभत । तदा समुद्रयात्राविषयो विचाराय प्रस्तुतः । सभानाथैश्च—श्रीमान् कुन्नपाक्कं श्रीनिवासाचार्यः, महीशूरपुरनिवासी राघवेन्द्राचार्यः, श्रीमान् दण्डपाणिदीक्षितश्चेति त्रयः स्वसहायतयाङ्गीकृता अभूवन्।

तत्र समुद्रयातुः संग्राह्यतां विधिकोटितयावलम्ब्य काशीशेषवेङ्कटाचलशास्त्रिणः उपन्यासमारचयन् । तैश्च " द्विजस्याब्धौ तु" इत्यादिवचनस्य " अब्ध्याजीवी " इत्यादिवचनेन सहैकवाक्यता, प्राचामार्याणामाचरितमालम्ब्य समुद्रयातुः सर्वथा संग्राह्यताच सम्यक् प्रत्यपादि ।

ततः कपिस्थलं देशिकाचार्यैः, निषेधकोटि मवलम्ब्य, महा-महोपाध्यायतिरुप्पुक्कुलि-अप्पाइति प्रसिद्धैः पण्डितैः रचितं समुद्रयाननिषेधपरं ग्रन्थमनुसृत्य, वाक्यार्थसरण्या विधिकोटिवादिभिरुक्ता विषयाः प्रतिक्षिप्ताः ।

एवं वादशैल्या प्रक्रान्तं विचारं स्वानभिमतमपि न निराकुर्वन सभानाथाः—वादरीतेः प्रकृताननुगुणतां सर्वेऽपि अध्यक्षयन्तु इतीवाभिसन्दधानाः; व्यसर्जयंश्चान्ततः कालातिपातात्सभाम् ।

9. तस्यामेव रात्रौ अग्रासनाधिपतिः अन्ये च समालोच्य सर्वथा उपन्यासशैल्यैव विचारः प्रवर्तनीय इति निरचिन्वन् । तृतीये दिवसे (7-4-1912) प्रातः सभायां सम्मिलितायां अग्रासनाधिपतिः-- "इतःपरं वादगोष्ठी न प्रवर्तेत, उपन्याससरण्यैव विचारः प्रवर्तनीयः" इति स्फुटं सयुक्तिकं च प्रत्यपादयत् । अनन्तरमेव केषांचित् पण्डितानां मध्ये महान् क्षोभः सञ्जातः । पण्डितेष्वेको महता संरम्भेण समुचितं विनयमप्यतिक्रम्य सभापतेर्वचनं खण्डयितुं, तस्मिन् अविद्यमानानेव कांश्चिद्दोषानारोपयितुं च प्रावर्तत । एवं कोलाहले वाक्कलहेच बहुलीभूते, 'इत्थं सभायाः प्रवर्तनं दुर्घटं भवेत्' इति निश्चिन्वन् सभानाथः "सभेयमियता समाप्यते" इति सखेदमवदत् । "अन्यत्र परिषदन्तरं सम्मिलिष्यति ; पूर्वमेव प्रकाशितान् नियमाननुरुध्य तत्र विषयविशेषान् विचारयितु मुत्सहमानाः पण्डिताः सन्निहिता भवन्तु" इति च उपाग्रासनाधिपतिः प्रत्यपादयत् । तावता सर्वेऽप्युदतिष्ठन् सभासदः ।

10. अथ तस्मिन्नेव दिने मध्याह्नात्परं पृथङ्निर्मितेय मन्या परिषत् आरणिप्रासादे प्रथमं नियमविशेषान् विशदीकृतानवगम्य, ततो धवनिकोत्सवमण्डपमागत्य, प्रकृतमेव समुद्रयात्राविषयम् उपन्यासरीत्या विचारयितुं प्रावर्तत । तत्र अधोनिर्दिष्टाः पण्डिता उपन्यासानकुर्वन् ।

(1) महामहोपाध्याय तात सुब्बराय शास्त्रिणः—

(*a*) "द्विजस्याब्धौ तु" इति वचनं धर्मज्ञसमयप्रमाणकमेव, न बृहन्नारदीयम् ।

(b) व्यवस्थाविपरिवर्तनं च कालदेशानुरोधेन कर्तुं शक्यम् ।

(c) अभ्यस्यमानमेव यानं बोधायनसूत्रे विवक्षितम् ।

(d) पातित्यप्रयोजककर्मणां प्रसक्तावेवपातित्यम्.

(e) यस्य यस्मिन् कर्मण्यधिकारोवर्तते तन्नान्तरीयकः संसर्गो न वर्जनीयत्वेनाभिमतः ।

2 मायगोण्ड कृष्णाचार्यः—

समुद्रयानस्य कर्तव्यत्वसाधकं कञ्चिदनुमानाभासं निर्दिश्य-तत्र हेत्वाभासाः स्फुटीकृताः ।

3 शास्त्री हार्थीबायि जामनगरम्—

समुद्रायातुः असंग्राह्यता प्रत्यपादि ।

**11.** चतुर्थेऽपि दिने 8-4-1912. प्रातः सभायां मिलितायाम् अयमेव विचारः प्रावर्तत—

4. के. नरसिंहशास्त्री बाङ्गलूर्

आवश्यकंनित्यकर्मसु समुद्रायातुः संग्राह्यता भवति ।

5. नामकल्लु श्रीनिवासशास्त्री—पूर्ववत्.

6. नौडूरि वेङ्कटाशास्त्री—

संसर्गसंग्रहपदयोः एकार्थता, प्रायश्चित्तेन संग्रहप्रकारश्च प्रत्यपादि ।

7. आर-वि-कृष्णमाचार्यः—

संव्यवहारार्थमेव यानं संयानम् ।

एवमन्येऽपि बहवः पण्डिताः विधिनिषेधपक्षावधिकृत्य स्वाशयानुगुणमुपन्यास्थन् । अथ तस्मिन्नेव दिने रात्रौ, अग्रासनाधिपतिना परिकल्पितानां केषांचित् प्रश्नानां प्रतिवचनरूपेण उपस्थितानां पण्डिताना मभिप्रायाः पत्रारूढा अगृह्यन्त । एतावता समुद्रयात्राविषयको विचारः समाप्तोऽभूत् । [अत्र विशेषा अनुबन्धे द्रष्टव्याः.]

**12.** अथ तस्यामेव रात्रौ वध्वा वैवाहिकं वयोऽधिकृत्य विचारः प्रास्तावि । महामहोपाध्यायाः रा. चन्द्रशेखरशास्त्रिणः अनन्यथासिद्धानां श्रौतलिङ्गानां प्राबल्यमवेक्ष्य प्रौढाविवाहस्य मुख्य-

ता अङ्गीकर्तव्या भवतीति पक्षमुपाक्षिपन् । पञ्चनदक्षेत्रादागताः शेषाद्याचार्याः सर्वथा प्रौढाविवाहो निषिद्ध एवेति पक्षमालम्ब्य उपन्यास्थन् । ततः ब्रह्मश्री टी॰ वी॰ श्रीनिवासशास्त्रिणः ऋतुमतीविवाहस्य गौणकल्पतया अभ्यनुज्ञानं शास्त्रेषु विद्यमानं सुविशदं हृदयंगमेन प्रकारेण न्यरूपयन् ॥

तावता सभा विसर्जिताभूत् ॥

13. अथ पञ्चमे दिने (9-4-1912) अमुमेव विषयमधिकृत्य विचारः प्रावर्तत—

तत्र

1. मायगोण्ड कृष्णाचार्यः—

वैवाहिकश्रुतिगतलिङ्गानां सावकाशतां न्यरूपयन् ।

2 तिरुमलिशै वरदाचार्याः—

श्रुतिलिङ्गयोः प्रकृतविषये विरोध एव नास्तीति प्रत्यपादयन् ।

3. पद्मनाभशास्त्रिणः—

प्रकृतिविषये लिङ्गानां प्राबल्यं समुचिततन्त्रवार्तिकश्रुतप्रकाशिकादिवाक्योपन्यासपुरस्सरं सम्यक् न्यरूपयन् ।

4. कुम्भघोणं नटेशशास्त्रिणः—

श्रौतलिङ्गादपि स्मार्तश्रुतेः प्राबल्यं प्रतिपादयितुमुपक्रम्य, "तन्त्रवार्तिकादीनां का गतिः" इति पृष्टाः तत्र प्रतिवचनं यथावत् अप्रकाश्यैव, यत्किमपि प्रतिपादयन्तः, मध्ये श्रुतिलिङ्गपदार्थौ अधिकृत्य सभानाथैः पृष्टाः यत्किमपि वदन्तः, शेषं कोपेन पूरयन्तः, विरता अभूवन् ।

14. एवं बहुभिरन्यैः पण्डितैः यथाशक्ति यथावकाशं विषयेऽस्मिन् विचारिते, पण्डिताना मभिप्रायाः पूर्ववदेव रात्रौ पत्रारूढा अगृह्यन्त । [अत्र विशेषा अनुबन्धे द्रष्टव्याः]

15. अथ षष्ठेऽपि दिवसे (10-4-1912) प्रातः सभा सममिलत् । मतान्तरं प्रविष्टानां पुनःसंग्रहमधिकृत्य प्रतिवादिभयङ्-

रानन्ताचार्यैः विचारः प्रास्तावि। बहूनामुपन्यासानामनन्तरं पण्डिताना माशयाः पूर्ववदेवागृह्यन्त। [अत्र विशेषा अनुबन्धे द्रष्टव्याः]

16. अथ मद्रपुरात् डाक्टर् सर्, स. सुब्रह्मण्यार्य महाशयैः प्रेषितः पण्डितपरिश्रमानुमोदनपरः समाप्त्युपन्यासः अपठ्यत। अग्रासनाधिपतिना च पण्डितेषु कार्यनिर्वाहकेषु अन्येषु च कृतज्ञता प्राकाश्यत। अथ आगामिनि वत्सरेऽपि परिषन्मेलनं भविष्यतीत्युक्त्वा सभामेनां सामोदं व्यसर्जयन् सभानाथाः।

महनीयचरितानामस्मत्पूर्वाचार्याणां शासनान्येवानुरुध्य धर्मपरायणैः कैश्चित् वैदिकैः लौकिकैश्च महाशयैः प्रक्रान्तेयं परिषत् अन्तराजातमप्यन्तरायजातम् ईश्वरानुग्रहादतिक्रम्य यत्किञ्चिल्लोकोपकारकं सफलमेव कर्म निर्वर्तयितुमक्षमतेति कस्य वा तटस्थस्य नेदमवकल्पेत महते मोदाय। अत्र च प्रवृत्ताः लौकिकमहाशयाः पण्डिता वा परम्परागतानामाचाराणाम् अधरोत्तरं विपरिवर्तने श्रद्धां नैव बध्नन्ति, परं तु धर्मं केवलमभिनिविशमानाः शास्त्रगुहायां निहितं धर्मतत्त्वं निष्कृष्य बहिः प्रकाशयितुमभिलषन्ति। अतः सर्वथा अभिनन्दनीयाप्येतेषां प्रवृत्तिः केषांचिदतिशङ्कामुपजनयतीति लोकस्वभाववैचित्र्यम् उपलभमानाः केवलमन्तश्चित्रीयामहे !।

यथा वा शास्त्रैकधना वयम् इतोऽपि न हीयेमहि,यथा वा गहनं धर्मतत्त्वं कालदेशानुगुण्येनाविष्कृतं भवेत्, यथा च आधुनिकभारतीययोगक्षेमनिर्वाहे पण्डितवर्यैः अवश्यंकर्तव्यं कृत्यजातं सम्यग्विधीयेत,तथा भूयोऽप्येतादृशपरिषन्मेलनेन अभिमतं फलमासाद्य सर्वेश्वरानुग्रहस्य भाजनमचिरात् भवेम—इति सुदृढं विश्वसिमः॥

शम्.

अनुबन्धः I.

॥ विलिख्यदत्तेषु उपन्यासेषु केचिदधः प्रकाश्यन्ते ॥

# ॥ वैवाहिकं वधूवरयोर्वयः ॥

---

A

अत्र "उपायनोदितः कालः स्त्रीणामुद्वाहकर्मणि" इत्यादिवचनेन गर्भाष्टमादिः यावदृतुदर्शनं वैवाहिकः काल इति प्रतीयते। उपनयनस्य यथा "आषोडशात् ब्राह्मणस्य" इत्यादिवचनबलात् उत्कर्षः, तथा विवाहस्यापि "त्रीणि वर्षाण्युदीक्षेत कुमारी ऋतुमती सती। ऊर्ध्वन्तु कालादेतस्मात् विन्देत सदृशं पतिम्"॥ इत्यादि वचनैरुत्कर्षः प्रतीयते। तथा "उत्कृष्टायाभिरूपाय वराय सदृशाय च। अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि" इत्यादिवचनैर्विवाहस्यापकर्षश्च प्रतीयते। तथाच गर्भाष्टमादिः मुख्यः कालइति, इतरौ गौणकालावितिच प्रतिभाति। वैवाहिकमन्त्राणां पर्यालोचने तद्गतलिङ्गस्वारस्यात् ऋतुमतीनामेव विवाहो मुख्य इति प्रतिभाति। स्मार्तविध्यपेक्षया श्रौतलिङ्गस्य दौर्बल्यशङ्कायां प्रसक्तायाम्, "यत्र पुनः श्रुतिरानुमानिकी, लिङ्गंच प्रत्यक्षं तत्र कथं—यथा स्मृतिवैदिकलिङ्गविरोधे तत्र स्मृतेर्मूलान्तरमपि सम्भाव्यते, नतु वैदिकलिङ्गस्येति, तदेव बलवदित्यनुसर्तव्यम्" इति कुमारिलभट्टोक्तेः श्रौतलिङ्गस्यैव प्राबल्यमायाति। अतएव माधवादयः, मातुलसुतापरिणयनं साटोपं प्रतिषेधन्तीषु बह्वीषु स्मृतिषु जाग्रतीषु "आयाहीन्द्र"—इत्यादिऋग्गतलिङ्गप्राबल्यमास्थाय मातुलसुतोद्वाहं शास्त्रीयं प्रसाधितवन्तः। यत्तु "वारुणीभिरादित्यमुपतिष्ठते" इत्यादिषु श्रौतलिङ्गापेक्षया स्मार्तविधेरेव प्राबल्यमङ्गीकृतम्, तत्र श्रौतलिङ्गस्य अन्यत्रचारितार्थ्यं बीजम्। प्रकृते तु तादृशस्य विनिगमकस्याभावात् श्रौतलिङ्गप्राब-

त्यं सुस्थम् । एवंच उक्तमान्त्रवर्णिकलिङ्गबलात् ऋतुमतीविवाहस्यै-
व प्राथमकल्पिकत्वं सिध्येत् ॥

आस्तां श्रौतलिङ्गप्राबल्यदौर्बल्यादिविचारः। सर्वथापितु गौण-
कल्पतया ऋतुमतीनां विवाहः आद्रियत एव स्मृतिभिः, न निराक्रि-
यते ॥ यानि पुनः "पितुर्वैश्मनि—स विप्रोवृषलीपतिः" इत्यादी
नि वचनानि तत्प्रतिषेधकानीव भान्ति,न तानि सामान्येन ऋतुमती-
पित्रादीनाम् , तस्याः तत्परिणेतुर्वा दोषं बोधयितुमर्हन्ति ॥
"काममामरणा — गुणहीनायकर्हिचित्" इत्यादिवचनेन कन्या
यामृतुमत्यामपि गुणवद्वरप्रतीक्षया ताम् अयच्छतां पित्रादीनां
दोषाभावस्य प्रतिपादनात् । "अदीयमाना—यंसाधिगच्छति" इ-
त्यादिवचनेन ऋतोरूर्ध्वं ऋतुत्रयावधि वर्षत्रयावधिवा पित्रादिशासन
प्रतिपाल्य तदूर्ध्वं स्वयमेव पतिं वरयन्त्याः कन्यायाः तत्परिणेतुर्वा क-
ण्ठरवेण दोषाभावकथनात्। अतो यः पित्रादिः गुणवद्वरलाभेपि क-
न्यामृतुमतीं न प्रयच्छति, या कन्या पित्रादिशासनमननुरुन्धाना रा-
गादिना स्वयमेव कंचन वृणीते,वर्षत्रयपर्यन्तं गुणवद्वरलाभे ऋतुत्रय-
पर्यन्तं वा अनुवर्तनीयपित्रादिशासना तत्स्वभूता—यश्च वरो रागप्रेरि-
तएव तादृशीं कन्यां विवहति, तद्विषयत्वमेव निषेधशास्त्राणामिति
पर्यवस्यति । सूचितश्चायमर्थः 'ब्राह्मणोमदमोहितः'इति वदद्भिः स्मृ-
तिकर्तृभिरेव ॥ अतो गुणवद्वरं प्रतीक्षमाणैः पित्रादिभिः कारितोपि
ऋतुमतीविवाहो नाशास्त्रीयो भवति ॥

इति सर्वमनाकुलम्

महामहोपाध्याय. रा. चन्द्रशेखर शास्त्री,

मैलापूर.

---

B

श्रीगणेशाय नमः । "रतिपुत्रधर्मार्थत्वेन विवाहस्त्रिविधः । तत्र
पुत्रार्थो द्विविधः । नित्यः काम्यश्च । तत्र नित्ये पूजार्थे 'सवर्णः श्रो
त्रियो वरः'इत्यनेन सवर्णा मुख्या दर्शिता । इदानीं काम्ये नित्यसंयो-

गे चानुकल्पो वक्तव्य इत्यत आह"-इत्येवमाचाराध्यायस्थ 'यदुच्यते' इत्यस्य श्लोकस्यावतरणे मिताक्षरायां विवाहविधा उक्ताः। तत्र पुत्रार्थविवाहस्य नित्यत्वोक्त्या विवाहस्य केवलकाम्यत्ववादः परास्तः। तैत्तिरीयशीक्षाध्याये 'प्रजातन्तुं मा व्यवच्छेत्सीः' इति कथनेन 'जायमानोह वै ब्राह्मणस्त्रिभिर्ऋणवा जायते, 'प्रजया पितृभ्यः' इति ऋणत्रयापाकरणस्यावश्यकत्वोक्त्या पैतृकर्णापनयस्य च प्रजोत्पादनैकसाध्यत्वोक्त्या च विवाहस्य नित्यत्वोक्तिराञ्जस्य मञ्चति। अत्रेदं विचारणीयम्—कन्याया विवाहः कतिवर्षीयाः स्मृत्यनुशिष्टः ? अत्र मनुः—'त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्'। इह द्वादश वार्षिकीमिति तद्धितान्तनिर्द्देशात् परिपूर्णद्वादशवर्षाम् अर्थात् त्रयोदशे वर्षे विवाहः कर्त्तव्य इति फलति। यद्यपि युग्मवर्षे विवाहप्राशस्त्यमुक्तम् तथापि जन्मतो गर्भतोवापि गणनायां त्रयोदशवर्षस्य मासत्रयात्यये युग्मवर्षत्वलाभोपि भवतीति तद्विषये इष्टकल्प एवादर्त्तव्यः। नच-रजोदर्शनात्प्रागेव विवाहयितव्या, यतः कन्याया रजोदोषे पित्रादीनां पातकित्वापत्तिः; अतो दशमवर्षादूर्द्धमेकादशवर्ष एव विवाहः कर्त्तव्यः, यत्कारणं'दशवर्षा भवेत्कन्या अत ऊर्द्धं रजस्वला' इति वाक्येन दशवर्षाधिकवयस्काया रजस्वलाशब्देनाभिधानादिति वाच्यम्। कन्याया रजोदर्शनात्प्रागेव विवाहस्य सर्वसम्प्रतिपन्नत्वेऽपि विवाहविधायकमन्वादिवाक्येषु 'द्वादशवार्षिकीम् इत्यादि स्पष्टलिङ्गबलेन ततः पूर्वं विवाहस्य अप्राप्ततयाऽनन्तरोक्तनियमालाभात्॥ स्यादेतत्—'अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी' त्यादि पाराशरीयवचनेऽष्टवर्षीया अपि विवाह्यत्वकथनेन 'गौरीं ददन्नाकलोकम्' इत्यादितत्तद्विशिष्टफलनिर्द्देशेन,स्वयं मनुनापि 'त्रिंशद्वर्षः' इति वाक्यशेषे 'त्र्यष्टवर्षोऽष्टवर्षां वा' इति स्पष्टमष्टवर्षाविवाहस्य विधिगोचरीकरणेन च अष्टप्रभृतिवर्षेषु भवेदेव कन्याया विवाह्यतेति। अत्रोच्यते—'अष्टवर्षा भवेद्गौरी'इत्यादि पाराशरीयं वचो न विवाहविधिपरम्,किंतु गौरीरोहिण्यादिसंज्ञाबोधकम्;यच्च 'गौरीं ददन्नाकलोकम्'इत्यादि फलविशेषवचनम्, तदपि दानप्रकरणोक्तत्वेन न विवाहविधितावगाहनक्षममिति न किञ्चिदेतत्। 'त्र्यष्टवर्षोऽष्टवर्षां वा' इति मनुवचनं तु 'धर्मे

सीदति सत्वरः' इति वाक्यशेषोक्तार्थबलेन धर्मानुष्ठानत्वरातुरस्य 'वा'इत्यनास्थाद्योतकनिपातसंवलितम् अष्टवर्षाया अपि विवाह्यतानुज्ञापकमिति न मुख्यः कल्पः । अपि च विवाहसंस्कारे संवृत्ते व्यवायधर्मस्य अव्यवहिता प्रवृत्तिर्नक्कापि विधिगोचरेत्यपि सूक्ष्मेक्षिकार्हम्। अतश्च रजोदर्शनानन्तरमेव व्यवाययोग्यता प्रायेण शिष्टकुटुम्बेषु व्यवहारविषया दृश्यते।'ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम्'इत्यादिसुश्रुतवचसामपि गर्भाधानसमयनियामकत्वमेव सुवचम् वाक्यशेषे'यद्याधत्ते पुमान् गर्भम्' इति स्पष्टीकारेण न तेषां विवाहसमयबोधकत्वम्, यतस्तत्र विधिच्छायाया अप्यनुपलम्भात् । पुरुषस्य तु विवाहयोग्यं वयो ब्रह्मचर्याश्रमपूर्तिकालावधिकमेव । तच्चाष्टवार्षिकस्योपनयनानन्तरं चरमकल्पेन द्वादशवार्षिकब्रह्मचर्यावसाने सति विंशतिवार्षिकत्वमवरः कालः । ततःपरं मनूक्तः 'त्रिंशद्वर्षो वहेत्' इति वरः कालः। एतेनैतन्निर्णीतप्रायम् यद्वधूवरयोर्वयोन्तरम् अष्टवर्षकादवधेर्विंशतिवर्षदेश्यमेव, न ततोऽधिकमुभयोः श्रेयसेऽवकल्पत इति शिवम् ॥

हाथीभाई - शङ्करशास्त्री,

जामनगर.

---

C

आर्याः भारतसुहृदः पण्डिताश्च !

यदुत—

चिरादिव बहवो वैदिका लौकिकाश्च तलातलि, केशाकेशि, दण्डादण्डि मिथः कलहायमानाः यथाप्रतिभातानर्थान् शास्त्रविर्गीतान् वर्णयन्तो यथाजातान् जनान् परं व्यामोहयन्तीति—तादृशानि अनर्थजातानि परिहर्तुं प्रवृत्तायां प्रकृतायां पण्डितमहासभायां वधूवरयोर्वयःकालादिकं यथामति परिशीलितं निवेदयामः शास्त्रसम्मतम् इह चामुत्र च सुखकरम्। केचित् प्रौढानामेव कुमारीणां, अपरे षोडशवार्षिकीणां, परे द्वादशवार्षिकीणां, इतरे अष्टमादिदशमान्तवयसां, अन्ये ताभ्योऽपि न्यूनाम्—अस्य वस्तुनः स्वभाव ईदृशः, इदं

रमणीयम् , इदमरमणीयम् , इमे विप्रलम्भकाः, इमे पुनरतादृशाः, इदं महान्तमनर्थमापादयति,इदं चारुचरित्रं खण्डयति, अस्य परिग्रहः सुखाग्रहः सुमहत्प्रीतिस्थानम्-इत्यादिकमनाकलयन्तीनामेव कुमारीणां कारयन्ति परिणयविधिम्,उत्पादयन्ति महदेव दुःखम्।अपि नामजानन्ति ताः कियन्ति कीदृशानि कुसुमानि,अपि वा केशसंस्करणं तदीयाः शैलीश्च।हाराहँ कुचतटे कोष्णान्यश्रूणि धारयन्तीत्यहो दौर्भाग्यपारम्परी। अस्तु भोः कोऽस्यप्रतीकारः? कश्च शास्त्रमर्यादां नातिशेते इति—यदि कश्चित् पृच्छति धार्मिकः, परं प्रमोदामहे।

"माता चैव पिताचैव ज्येष्ठो भ्राता तथैवच।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम्॥
तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत्॥"

इति संवर्तः॥

"प्रदानं प्रागृतोः स्मृतम्" इति मनुः।
"प्रदानं प्रागृतोः" इति महर्षिः गौतमः।
"उत्कृष्टायाभिरूपाय वराय सदृशाय च।
अप्राप्तामपितां तस्मै कन्यां दद्याद्यथाविधि॥
काममामरणात्तिष्ठेत् गृहे कन्यर्तुमत्यपि।
नचैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित्॥"

इत्यादिभिः महात्मनां मुनीनां स्मरणशतैः, पुरातनीनां कुमारीणां सारासारविवेचनकुशले वयस्येव समधिगतविवाहानां कथानामनुसारेण ऋतोः पूर्वमेव परिणयः समुचितः। ऋतुश्च केषांचिन्मते दशमात्परतः, केषांचित्तु ततोऽपि परतः इति। "विवाहस्त्वष्टवर्षायाः" इति अष्टमादिः दशमान्तः कालस्तु—"गौरीं वाप्युद्वहेद्भार्यां नीलं वा वृषमुत्सृजेत्। यजेत वाश्वमेधेन विधिवद्दक्षिणावता॥" "गौरीं ददन्नाकपृष्ठं वैकुण्ठं रोहिणीं ददत्। कन्यां ददत् ब्रह्मलोकं रौरवन्तु रजस्वलां"॥—इति वचनैः दातुः प्रतिगृहीतुश्च फलश्रवणात्, अकरणे प्रत्यवायाकथनात् , काम्यः—अष्टमादिवर्षकालिक मुपनयनमिव;यथाह आपस्तम्बः—"अथ काम्यानि,सप्तमे ब्रह्मवर्चसकामम् , अष्टम आयुष्कामम्,नवमे तेजस्कामम्" इत्यादि।विष्णुः—"अष्टमे स-

र्वकामस्य नवमे कान्तिमिच्छतः" इति। "वयोविशेषेण दातुः फलविशेषानाह मरीचिः—'गौरीं ददत्" इति लिखन्तः पराशरमाधवीये माधवाचार्या अपि काम्यत्वमिवास्यानुमेनिरे। ऋतुपूर्वकालस्तु मुख्यः। अनन्तरकालस्तु महति प्रतिबन्धक इति गौणः।

अहो! भ्रान्तोऽसि। "दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला" इति संवर्तवचनं विस्मृतवानसि, कथमन्यथा दशमात्परमपि वयस्समुचितमिति। मैवं वादीः; तत्र तत्र दशमादुपर्यपि वयसः द्वादशादिष्वेव रजसः प्रादुर्भावस्य उद्वाहस्य च विधेः कथनं कथमिव औचिती मासादयति? विमृशतु चिरं सुहृत्। द्वादशे वर्षे रजःप्रादुर्भावमभिधत्ते आपस्तम्बः—"प्राप्ते तु द्वादशे वर्षे रजः स्त्रीणां प्रवर्तते"। एतच्च प्रायिकाभिप्रायम्; न पुनः द्वादश एव रजस्वला भवति; कासांचिदर्वागपि रजोदर्शनसम्भवात् — इति वैद्यनाथदीक्षिताः। एवमन्यत्रापि ते—"अत ऊर्ध्वं रजस्वला"—इदमपि कादाचित्काभिप्रायकम्, तदा रजसो नियमेनासम्भवात्; अत एव संवर्तः—"प्राप्ते तु द्वादशे वर्षे" इति। संस्कारमयूखकारोपि एवमेवाभिप्रैति। "त्रिंशद्वर्षः षोडशाब्दां भार्यां विन्देत नग्निकाम्" इति व्यासोक्तिरपि साम्प्रतमेव सङ्गच्छते। "ऋतुकालमिति प्रोक्तं गार्ग्यादिमुनिसत्तमैः। स्त्रीचिह्नं यौवनं प्राप्य षोडशे वत्सरे सदा॥ कृत्रिमा दशमादूर्ध्वं औषधस्य निषेवणात्। एकादशे द्वादशे वा ऋतुकालं वदन्ति हि॥ अनुरागात् द्वादशाब्दे त्रयोदश्यान्तु केचन। चतुर्दशे पञ्चदशे स्त्रीचिह्नं तु भविष्यति॥ वातजा पित्तजाचेति दारुणी त्रिविधा स्मृता। वातजा द्वादशे वर्षे पित्तजा च चतुर्दशे॥ दारुणी षोडशे वर्षे शोणितं पतति ध्रुवम्।"—इति कालप्रदीपिकाकारैः कारणभेदेन आकृतिभेदेन च दशमादुपरितनेष्वेव वर्षेषु रजसः प्रादुर्भावस्य वर्णनात्, अनुपदप्रतिपादितापस्तम्बादिवचनप्रामाण्याच्च दशमादर्वागेव विवाहस्य समुचितत्तामुत्पश्यतां मतमनभिमतं गलहस्तितं भवति। "तस्मात् गर्भाष्टमः श्रेष्ठः जन्मतो वाष्टवत्सरः" इति यमवचनं तु "सप्तसंवत्सरादूर्ध्वं विवाहः सार्ववर्णिकः। कन्यायाः शस्यते राजन् अन्यथा धर्मगर्हितः"॥इत्यादिभिः गर्भाष्टमस्य निषिद्धत्वात् असारम्।

आगर्भाष्टमम् आच दशमात् वयांसि, "प्राग्वासः प्रतिपत्तेरित्येके" इति सूत्रयन् महर्षिः गौतमः न प्रशंसतीव । किमिति, एके इति प्रायोजि महर्षिणा? "यावच्चेलं न गृह्णाति यावत्क्रीडति पांसुभिः । यावद्दोषं न जानाति तावद्भवति नग्निका ॥ यावन्न लज्जिताङ्गानि कन्या पुरुषसन्निधौ । योन्यादीन्यवगूहेत तावद्भवति नग्निका" ॥

सोपानात् सोपानमधिरोहदिव अष्टमेन चेलग्रहणम्, नवमे पांसुक्रीडानिवृत्तिः, दशमेनैव दोषपरिज्ञानं न लज्जा परिग्रहः—इति सर्वमिदम् एकादशात् प्रभृति सम्भवतीति स एव समयो युक्ततमः। विवाह्यायाः लक्षणमभिदधत्कन्यायाः "अनग्निकाम्" इति जैमिनीयं गृह्यमपि अस्माकमनुकूलम् । अथवा देशकालादिवैषम्यादिना परतोऽभिमतवरालाभसम्भावनायां न कालः प्रतीक्षणीय इति प्ररोचनामात्रम् आहोस्विदभ्यनुज्ञामात्रमेतत्।यमस्त्वेवमाह—"देशकालादिवैषम्यात् अधर्मो ह्याहसंशये । सदृशासम्भवे कन्यां नग्निकामपि दापयेत् ॥" "अप्राप्तामपि ताम्"इति मनुश्च। "द्विवर्षात्प्राग्विवाहश्चेत् कन्यकामरणं यदि । खननं नैव कर्तव्यं मन्त्रसंस्कारमाचरेत् ॥" इति प्रजापतिस्मरणेन शैशवएव विवाहितायाः तदनु कामपि दशां गतायाः बालिकायाः मन्त्रसंस्कारस्योक्तत्वेन मातुरङ्कशायिनीनां स्तन्यपायिनीनामेव तासां विवाहार्हन्तां पश्यन्ति, स्वानभिज्ञतां याज्ञिकतांच प्रकाशयन्ति केचित्, प्राशस्त्यमपि मन्यन्ते तदा विवाहस्य। "षडब्दमध्येनोद्वाह्या कन्यावर्षद्वयं यतः ।" इति ज्योतिर्निबन्धे, "जन्मतो गर्भाधानाद्वापञ्चमाब्दात्परं शुभम् । कुमारीवरणं दानं मेखलाबन्धनं तथा॥" इति पराशरमाधवीयेच दर्शनात्,न तस्य प्रशस्ततां नापि शास्त्रीयतां पश्यामः । पूर्वम् अपत्यसम्बन्धाय कृतप्रतिज्ञयोः कयोश्चन सुहृदोः धर्मविप्लवशङ्कया भीतयोः मानुष्यकमात्रसाधारण्या शरीरस्यानित्यतया परतः तदनिर्वहणकातरतया निर्वृत्तविवाहपरमेतदिति दूरीकृतदुराग्रहाः कोविदाः। अभ्यनुजानाति अङ्गिराः एतादृश एव स्थले—यथा "आवृत्ते तीर्थगमने प्रतिज्ञातेच कर्मणि । कालात्ययेच कन्यानाम् कालदोषो न विद्यते ॥" इदंच उदाहतर्त्वे— "पितुर्गेहेतु या कन्या रजः पश्यत्यसंस्कृता । सा कन्या वृषली ज्ञेया तत्पतिः वृषलीपतिः ॥" इति हारीतेन ऋतुमत्याः अशुद्धेः, 'कन्या-

मृतुमतीं शुद्धां कृत्वा निष्कृतिमात्मनः। शुद्धिं तु कारयित्वा तु उद्व- हेदानृशंस्यधीः ॥" इति आश्वलायनेन प्रायश्चित्तस्य विधानात् , आर्तवानन्तरकालिको विवाहो गौणः। अयमत्र संपिण्डितार्थः— कुमारीणां तत्तद्देशकालस्वभावानुसारेण आर्तवकालात्पूर्वं दशमाद्वयसोऽनन्तरंच विवाहः सांप्रतम्; नहि क्वाप्युपलभामहे प्रत्यक्षतः शास्त्रतो वा अष्टमादिषु वयस्सु कुसुमं कुमारीषु इति ॥ "अष्टवर्षाभवेत्" "सप्तसंवत्सरा," "विवाहस्त्वष्ट" इत्यादिभिस्मृतिभिः दशमादुपरिच उद्वाहविधिं प्रतिषेधयन् , "त्रिंशद्वर्षः षोडशाब्दां" इति भारतीयस्य "त्रिंशद्वर्षो वहेत्—द्वादशवार्षिकीम्" इति मानवीयस्य च वचनस्य दातुरभावपरतामभिप्रैति कमलाकरभट्टः । तदीयानि पुनरक्षराणि इमानि –"दातुरभावे द्वादशषोडशाब्दे विज्ञेये" इति । "पिता दद्यात्स्वयं भ्राताचानुमतौ पितुः। मातामहो मातुलश्च सकुल्यो बान्धवस्तथा ॥ मातात्वभावे सर्वेषां प्रकृतौ यदिवर्तते। तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः ॥ यदा तु नैव कश्चित्स्यात् कन्याराजनमाव्रजेत्। पिता पितामहो भ्राता सकुल्या जननी तथा॥ कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः।" इति नारदयाज्ञवल्क्यौ। कन्यकावितरणधुरां बहुषु अधिरोपयत्सु अहो कौशलम्। इदमिह किञ्चित्पृच्छामः तत्र भवन्तं धर्ममर्मज्ञम्—किमाकलयति भवान् एतेषु एकस्य उत सकलानामपि शून्यताम्? यदिपुनरेकोऽस्तमियात्,बहवः तत्कार्यनिर्वहणधुरीणाः; कथमिव कालातिपातःस्यात्? अथसर्वशून्यतावादः, कृतमनया दुरितं महदेव दुर्भगया महीमण्डलमवतीर्णया कन्यकया दौर्भाग्यपरम्परया। तथापि न तवाक्षरस्वारस्यम्।तिष्ठतु भवान्; इतोऽन्यदपि यत्किञ्चित् श्रोतव्यमस्ति;किमेते कुमार्या आकलितपुष्पे, उतान्ये। परं दशमाद्वयसः भवन्मते नियमेन पुष्पसभवात् न चरमः। यदिपुनराद्यःकल्पः, "त्रिंशद्वर्षः षोडशाब्दां भार्यां विन्देत नग्निकाम्" इत्यत्र षोडशाब्दनग्निकापदयोः कथमेकार्थप्रतिपादनपरता ? यदाह अमरसिंहः—"नग्निकानागतार्तवा"। अथ यदीदं नानुमन्यते भवान्, "यावच्चेल"मिति वसिष्ठवचनमेवानुमन्यते, हन्त ! हन्त ! कुमारिकायामुन्मत्तता समारोपितेति दूयामहे । कापुनरनुन्मादिनी कुलकुमारी विचित्रतराणामम्बराणां धारणार्हे वयसि बहिष्कुरुतेचेलम् ?

कावा अङ्गरागं निराकुरुते ? पांसुकणैरनुलेपमङ्गीकुरुते ?—" गम्य-स्त्वभावेदातॄणां कन्याकुर्यात्स्वयंवरम् " इति याज्ञवल्क्येन कथञ्चिदपि दातारमलभमानायाः ऋतुकालात्पूर्वमेव स्वयंवरस्य कर्तव्यत्वेन प्रतिपादनात् दशमात्परस्मिन् वयसि रजस्वलात्वमभिमन्यमानस्य भवतः दातुरभावे इति लेखनं कथमिव युज्यते ? " गम्यन्त्वभावे " इतीदं अनृतुमतीविषयमिति भवदभिमता माधवाचार्या अपि आशेरते। आकलितपुष्पे कृतप्रायश्चित्त एव विवक्षिते इति तु अतीव साहसम्; " त्रीणि वर्षाण्यृतुमती कांक्षेत पितरं स्वयम्। ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम्॥" इति बोधायनः । अनेन ऋतुकालानन्तरं वर्षत्रयं यावत् पितुरधीनतायाः अनन्तरं स्वयंवरस्य प्रतिपादनात् चतुर्दशएव वयसि परिणयविधिरापद्यते तव मते, नतु षोडशे। अपि च तन्मते न तावन्तं कालम् अविवाहिताः ऋतुस्नाताश्च तिष्ठन्ति कुमार्य इति तु वृश्चिकात्पलायमानस्य महोरगमुखे निपतनमिति न तदाद्रियामहे।

इत्थमत्र निष्कर्षः—

1. सप्तमसंवत्सरात्पूर्वं विवाहो न कार्यः.

2. प्रतिज्ञाविषयेतु ततः पूर्वमपि कदाचित्कार्यः.

3. अष्टमात्प्रभृति दशमवर्षपर्यन्तम् अनुष्ठीयमानो विवाहः काम्यः.

4. दशमादूर्ध्वम् आरजोदर्शनं विवाहो मुख्यः.

5. रजोदर्शनानन्तरमपि वर्षत्रयं विवाहस्य गौणकालः, तदानीं प्रायश्चित्तमनुष्ठेयम्.

6. रजोदर्शनानन्तरं चतुर्थे तु वर्षे तया स्वयंवरः कार्यः.

वेङ्कटवरदाचार्यः,
काञ्ची,
(कोमलमारुतः.)

## D

### श्रीरस्तु.

यदुक्तम्—"शेषं समावेशने जपेत्" इति गृह्यसूत्रे विवाहप्रकरणे समावेशनस्य पठितत्वात् समावेशनपदस्य सम्भोगपरतया व्याख्यातत्वात् सम्भोगस्य ऋतुमत्यामेव सम्भवात् ऋतुमत्या अपि विवाहाभ्यनुज्ञास्तीति—तत्रोच्यते—किमयमृतुमतीविवाहोऽनेन गृह्यसूत्रशकलेनैवानुमीयते, उत स्मृत्यन्तरवचनपर्यालोचनयापि। नाद्यः, उक्तसूत्रवाक्यशकलस्य संवेशनविधायकत्वाभावेन संवेशनकालमनूद्य मन्त्रविशेषजपमात्रविधायकत्वेन उक्तसूत्रवाक्यमात्रेण अभीष्टसिद्ध्यभावात्। नच संवेशनस्यानुवादबलादेव विवाहमध्ये संवेशनमनुमतमिति वाच्यम्, अनुवादस्य विधिसापेक्षत्वात्, समावेशनविधिवाक्ये समावेशनरूपकर्मणः पार्थक्येनैव प्रतिपादनात्, तस्य विवाहान्तर्भावाभावात्, ऋतुमतीविवाहस्य तावता असिद्धेः। न द्वितीयः, स्मृत्यन्तरपर्यालोचनायां बहुषु बृहस्पत्यादिस्मृतिषु ऋतुमतीविवाहप्रतिषेधात्। यदपि समावेशनस्यापि विवाहकर्माङ्गत्वात् अङ्गमन्तरा अङ्गयसिद्धेः विवाहे समावेशनस्यावश्यकर्तव्यत्वं प्रतीयत इति—नैतद्युक्तम्; अङ्गत्वं किं दृष्टद्वारा वा अदृष्टद्वारा वा? न हि व्रीह्यादीनां यागादौ दृष्टविधया उपकारकत्ववत् संवेशनस्य विवाहे दृष्टोपकारकत्वं दृष्टम्। नाप्यदृष्टविधया; अदृष्टद्वारा उपकारकत्वरूपमङ्गत्वं हि तद्ग्राहक-क्त्वा-श्रुत्यादिभिरेव वक्तव्यम्; यथा "प्रक्षाल्यपादावाचामेत्" इत्यादिषु; नैवमिह तादृशी श्रुतिरुपलभ्यते; अतः समावेशने रागप्राप्ते मन्त्रविशेषजपमात्रमेव विधीयते। तच्च समावेशनं पृथक्कर्म विवाहानन्तरभावि इति उक्तमेव। यदपि प्रकरणेन समावेशनस्य विवाहाङ्गत्वं प्रतीयत इति, नैतद्युक्तम्; प्रकरणापेक्षया श्रुतेः बलीयस्त्वात्। ऋतुमतीविवाहनिषेधकश्रुतीनां बह्वीनामुपलम्भेन प्रकरणेन अभिमतार्थासिद्धेः। यदि च निरुक्तगृह्यसूत्रशकलस्वारस्यपर्यालोचनया सम्भोगरूपं समावेशनं विवाहमध्ये अवश्यं कर्तव्यमेवेत्याग्रहः, तर्हि ब्राह्मणस्य ऋतुमतीविवाहप्रतिषेधबलेन निरुक्तविवाहमध्यगतं समावेशनं वर्णा-

न्तरगतविवाहविषयमिति ब्राह्मणानामृतुमतीविवाहप्रसक्तिरेव नास्तीति । अस्य विस्तरोऽस्यां सभायां भविष्यति ॥

इति,

के. सुब्रह्मण्य शास्त्री,

षीमोग्गा, मैसूर्.

---

E

श्रीः

दुर्बलाः प्रबलायन्ते यत्पदं समुपाश्रिताः ।
सा सर्वतो बलवती श्रुतिर्नः शरणं ध्रुवा ॥

अथ स्मार्तश्रुतिवैदिकलिङ्गयोः किं दुर्बलं किं प्रबलमिति जिज्ञासायां विचारः प्रस्तूयते। विचारनिवर्त्यविशयास्पदं चात्र प्रसिद्धमेव पण्डितानाम् - यत्प्रथमा निरपेक्षस्वरूपा, चरमं पुनः अनादिनिधनापौरुषेयवेदगतमिति । उभयत्रापि स्मृत्यधिकरण बलाबलाधिकरणन्यायाभ्यां साधारणतया प्राबल्यस्य प्रतिभास इति । तथाहि— अनधिगताबाधितार्थबोधकत्वं प्रामाण्यम् इति हि सिद्धान्तः । तत्र स्मार्तश्रुतीनां पौरुषेयवचनरूपतया सम्भावितभ्रमविप्रलिप्साकरणापाटवरूपदोषप्रयुक्तज्ञानजन्यत्वसंशये न स्वतोऽबाधितार्थविषयकत्वं प्रत्येतुं शक्यमिति भवति तत्र मूलभूतापौरुषेयवेदापेक्षा, वैदिकलिङ्गस्यापि अनुष्ठानोपयोगिबोधजनने न स्वतः सामर्थ्यमित्यस्ति तत्र निरपेक्षस्वापेक्षा । ततश्च प्रामाण्यसिद्धावुभयोरपि परमुखनिरीक्षणं तुल्यमिति एकत्र निश्चयानुकूलविनिगमनाभावे विशयस्यावकाशो भवति इति । अत्रायमस्माकमाशयः—या खलु अनादिनिधना सर्वप्रवृत्तिमूलभूता दिव्या वेदमयी वाक् अलौकिकश्रेयःसाधकबोधकानां मूर्धाभिषिक्ता, सा न मात्रयापि प्रमाणान्तरेभ्यो दुर्बला भवितुमर्हति। नतरान्तु स्मृत्यपेक्षया। उपजीव्यविरोधोहि तदा स्यात्। उपजीव्यश्चायं सर्वोऽपि वेदराशिः स्मृतीनाम्, मन्त्रार्थवादमूला अपि हि स्मृतयो दृश्यन्ते; यथा—मरुभूमौ प्रपाः कर्तव्याः, ऋत्विजो ब्राह्मणान् वृणी-

युः इत्याद्याः—'धन्वन्निव प्रपा असि' 'ब्राह्मणानामिदं हविः' इत्यादिमन्त्रार्थवादमूलकाः। यद्यपि प्रवृत्त्युपयोगिप्राशस्त्यज्ञानजनकतया अर्थवादानाम्, प्रयोगसमवेतार्थस्मारकतया अन्यथा वा मन्त्राणां च, धर्मे प्रामाण्यमिति मीमांसकानां सिद्धान्तः, तथापि नासावनधिगतमर्थान्तरं प्रति प्रमाणभावं विहन्तुमीष्टे, वाक्यभेदो हि तदा स्यात् इति। प्राशस्त्यज्ञानादिजनकतया विशिष्य प्रामाण्यप्रतिपादनं तु अर्थान्तराबोधकानां बोधकानामपि तत्तत्प्रकरणोपयोगिनः प्रामाण्यस्य निरूपणायेति न व्यर्थम्। इत्थं च 'वेदोऽखिलो धर्ममूलम्' इति मनुवचनगतमखिलपदं मन्त्रार्थवादगतलिङ्गमूलकान्यधिकरणानि अर्थवादादिप्रामाण्योपजीवि स्मृतिप्रामाण्यम्—इत्येवं परम्, 'ऋत्विक् च ब्राह्मणो भवेत्' इत्यादिकौस्तुभवचनम्, 'अर्थवादाद्युन्नीतविधिमूलकत्वस्यापि स्मृतिषु दर्शनेन' इति भाट्टदीपिकावचनं च स्वरसतः सङ्गच्छन्ते। अतश्च उपजीव्यतया अपौरुषेयतया च वैदिकलिङ्गान्येव स्मार्तश्रुत्यपेक्षया प्रबलानीति सिद्धम्। अमुमेवार्थं स्पष्टमाहुः भट्टकुमारिला अपि—"यत्र पुनः श्रुतिरानुमानिकी लिङ्गश्च प्रत्यक्षम्, तत्र कथम्? यथा स्मृतिवैदिकलिङ्गविरोधे; तत्र स्मृतेः मूलान्तरमपि सम्भाव्यते, न तु लिङ्गस्येति तदेव बलवदित्यनुसर्तव्यम्; दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा। तदापि विपरीतत्वं शिष्टाकोपे यथोदितम्॥ अत्यन्तबलवन्तोपि पौरजानपदाः जनाः। दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः"॥ इति॥

तथा श्रुतप्रकाशिकाकाराः—"ननु अष्टवर्षं ब्राह्मणमित्यत्र उपनयनस्य अध्ययनाङ्गत्वमवगम्यते इत्युक्तम्; तस्योपनेयासत्तिद्वारा अध्येतृसाकांक्षाध्यापनाङ्गत्वं ह्यवगम्यते; 'उपनीयतु यः शिष्यम्' इत्यादिस्मृतिवचनाच्च तदवगम्यते। उच्यते—ब्राह्मणमुपनयीतेत्यत्र द्वितीयाश्रुत्या उपनयनस्य माणवकशेषत्वम् अवगम्यते; माणवकशेष उपनयनम्, अध्ययनं च तद्गतमेव; तत्र अन्तरङ्गबहिरङ्गन्यायादुपनयनमध्ययनाङ्गमेव। ननु 'उपनीयतु यः शिष्यं वेदमध्यापयेद्द्विजः। सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते' इति वचने क्त्वाश्रुत्या उपनयनस्याध्यापनाङ्गत्वं युक्तम्; अन्तरङ्गत्वं हि वस्तु सामर्थ्यरूपं

लिङ्गम् ,ततः क्त्वाश्रुतिः बलीयसीति चेन्न;अन्तरङ्गत्वं हि प्रत्यक्षश्रुतिसिद्धम् क्त्वा श्रुतिस्तु स्मृतिगता अनुवादवचनस्थाच अतोस्याः स्मृतिवचनस्थत्वात् मूलश्रुतिसापेक्षत्वम् अनुवादरूपवचनगतत्वात् विध्यन्तरसापेक्षत्वमिति विलम्बद्वयमस्ति;श्रुतिलिङ्गादिषु विलम्बितधीहेतुत्वं हि पारदौर्बल्यहेतुः अतो विलम्बद्वयोपहता क्त्वा श्रुतिः न बलीयसीति"अनेन हि स्पष्टमेवोक्तं वैदिकलिङ्गप्राबल्यम् । समन्वयसूत्रे वेदान्तानां कार्यपरत्वखण्डनावसरे "नचक्रिया क्षणभङ्गुरा आमुष्मिकाय स्वर्गाय कल्पत इति पारिशेष्यात् वेदतएव अपूर्वं कार्यं लिङादीनां सम्बन्धग्रहइति चेत्,हन्त चैत्यवन्दनादिवाक्येष्वपि स्वर्गकामादिपदसम्बन्धात् अपूर्वकार्यत्वप्रसङ्गः;तथाच तेषामपि अशक्यरचनत्वेनापौरुषेयत्वापातः;स्पष्टदृष्टेन पौरुषेयत्वेन वा तेषामपूर्वार्थत्वप्रतिषेधे वाक्यत्वादिना लिङ्गेन वेदानामपि पौरुषेयत्वमनुमितमिति अपूर्वार्थता न स्यात्; अन्यतस्तु वाक्यत्वादीनाम् अनुमानाभासत्वोपपादने कृतमपूर्वार्थत्वेन अत्र तदुपपादकेन।उपपादितंच अपौरुषेयत्वमस्माभिर्न्यायकणिकायाम्;इहतु विस्तरभयान्नोक्तम्;तेन अपौरुषेयत्वे सिद्धे भूतार्थानामपि वेदान्तानां न सापेक्षतया प्रामाण्यविघातः"-इत्यादिवदन्तो वाचस्पतिमिश्रा अपि अपौरुषेयत्वमेव प्रमाणानां प्राबल्ये नियामकं मन्यन्ते। इदमत्रावधेयम्-वैदिकलिङ्गं हि स्वविरोधिनीं स्मार्तश्रुतिमुपलभ्य स्वाश्रयस्य प्रधानं किञ्चित् प्रति शेषत्वबोधने नद्रागेव कुण्ठप्रवृत्ति भवति, किंतु तामप्यविश्वस्य अनन्यापेक्षसजातीयवैदिकश्रुत्युत्कण्ठया तत्कल्पने प्रवर्तत एव।सर्वः सगन्धेषु हि विश्वसिति।नच मार्गणो मार्गणान्तरं मृगयते। स्मार्तीच श्रुतिः स्वयं जात्याप्रबलापि पौरुषेयगतत्वेन दुर्बला नद्रागेव लिङ्गविरुद्धं विनियुङ्क्ते, येन लिङ्गस्य कल्पनामूलोच्छेदः स्यात्। किंतु आत्मनि अप्रत्ययासती यावद्वेदवचनं कल्पयति,तावदेव वैदिकलिङ्गेन स्वकार्यं निर्वर्त्यत इति कथं सा स्मार्ती श्रुतिः प्रबलाभवतु ? स्वोपाजीव्यं वैदिकलिङ्गं प्रत्यक्षमासाद्य स्वयं कुण्ठीभवतीतु युक्तम् . अतएव 'यत्र पुनरानुमानिकी श्रुतिः, लिङ्गंच प्रत्यक्षं तत्र कथं यथा स्मृतिवैदिकलिङ्गविरोधे ' इत्यादिकमुक्तं भट्टकुमारिलैः-इति। यदि पुनः वस्तुसामर्थ्यं भवति लिङ्गम् तर्हि श्रुतिसामान्यमपि तन्नातिवर्तितुं क्षमम्, अतएवहि 'कृष्णलं पचति' इत्यत्र पचिः वस्तुसामर्थ्यमनुरुध्य उष्णीकरणानुकूलव्यापा-

रमात्रे विश्रामयति, नतु विक्लत्तिपर्यन्तं अभिधेयं व्याप्नोति 'आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी' इति न्यायात्। यत्तु 'नैवतावच्छ्रुतिस्मृत्योः स्वरूपेण विरुद्धता। बलाबलपरीक्षा वा प्रमेयद्वारिका हिसा' इति भट्टवार्तिकं स्मार्तश्रुतिप्राबल्ये प्रमाणयन्ति, तत् न समअसम्; इदं हि पदार्थप्राबल्याधिकरणस्थं पदार्थतत्क्रमबोधकयोः सजातीययोः विजातीययोश्च प्रमाणयोः प्राबल्यदौर्बल्ये नियामकमिति प्रकृतानुपयुक्तत्वात्। इत्थंचसिद्धे वैदिकलिङ्गप्राबल्ये यानि तद्विरोधीनि सुदर्शनाचार्यमाधवाचार्ययोः 'अन्वोवैनाममभिमन्त्रयते' 'वारुणीभिः आदित्यमुपतिष्ठते' इत्यादि वचनानि, तेषां गतिः चिन्त्याभवति—इत्यलम् ॥

एम्. के. पद्मनाभशास्त्री,
वेदान्तविशारदः, अडयार् पुस्तकशालायाम्,
पण्डितः.

श्रीः

## अनुबन्धः II.

# सभानाथानामुपन्यासः

यो नित्यो यमुपासतेऽखिलजना येनेदमावास्यते
यस्मै कर्म करोति सात्त्विककुलं यस्माज्जगज्जायते।
यस्यैश्वर्यमवेद्यनैजविभवं यस्मिन् हि विश्वं स्थितं
तं दूरे पुनरन्तिकेऽपि विदितं ध्यायामि नारायणम् ॥

यः श्रीवैष्णवसाम्यदर्शनगुरौ प्रीतिप्रसन्नः प्रभुः
वेदान्तार्थविलासविश्रुतकृपासारोदरः 'श्रीपतिः।
भक्तानामभयप्रदाना निपुणस्त्रैलोक्यसाम्राज्यभाक्
पात्वस्मान् वरदो गजाद्रिवसतिर्देवाधिराजस्सदा ॥

पूर्वाचार्यवरैः प्रविष्टपदवीमारुह्य सम्भाविता
तैर्दत्ताधिकृतिप्रणीतविभवा धर्मज्ञसंसेविता।
या पूज्या परिषत् प्रमाणकुशला धर्मप्रक्लृप्तौ पुन-
स्तत्सन्देहविनिर्णये च विधिवत्तामद्य नौम्यदरात् ॥

मन्वादिस्मृतिषु प्रजाहितकरीष्वाम्नातधर्मान् बहून्
ज्ञात्वा तैस्सुसमाहितान् समुचितान्धर्मान्प्रवक्तुं बुधाः।
येऽर्हाः शुद्धचरित्रभूषितगुणास्तैरेव संयोजिता-
मेतां लोकहितैषिणीं परिषदं भूयो नमस्याम्यहम् ॥

कालाद्देशाद्विप्लुतं धर्ममार्गं श्रौतस्मार्तन्यायचक्षुर्द्वयेन।
दर्शंदर्शं शोधयन्तीति पूर्वैराम्नाता ये नौमि तान् पारिषद्यान् ॥

भो भो धर्मविद्वराः पण्डितवर्याः !

तत्रभवतां प्रसादातिशयेन द्रव्यभावमापन्नः महतां शासनानुरोधेन अस्यां परिषदि मुख्यपदवीं प्रापितः दासजनोऽयं सविनयं विज्ञापयति—

विदितमेव तत्र भवताम् यथास्मिन् भरतखण्डे वेदवेदान्तमार्गानुयायिनां समाजे शास्त्रचोदितधर्मानुष्ठानविषये कालगत्या कापि क्लिष्टता समजनीति। अरण्येष्वाश्रमवासिनां जनपदेषु ग्रामनिवासिनां च यावदस्ति वैदिकसामयाचारिकधर्माचरणे सौकर्यम् तावन्नैव पुरवासिनामित्यत्र न कोपि सन्देहः। इदानीं तावत् बहुभिः कारणैर्बहूनां नगरनिवासे काप्यपूर्वा अभिरुचिस्संजायते; नागरकताविहीनः पुरुषः पशुसमानः पामर इति च प्रायशो गृह्यते। प्रजाबाहुल्यं चास्मिन् देशे दिनेदिने वृद्धिमुपैति, सुरक्षितत्वात् तासां सर्वासाम्। "राजा कालस्य कारणम्" इति यदस्मत्पूर्वैरुक्तम्, तस्य सत्यत्वमनेकैर्हेतुभिः सुसाधम्। अस्मिन् भरतखण्डे वैदिकमतविसंवादिमतान्तरप्रविष्टाः बह्व्यः प्रजाः पूर्वं नासन्, राजानश्च बहुशो वैदिकमतावलम्बिन एवासन्। तस्मात् अभिवर्धमानजनबाहुल्येन नूतननागरकताप्राबल्येन मतान्तरावलम्बिजनसहवासेन नवीनाङ्गलराजाधिकारेण च समुत्पादितो यः कालभेदः तमधिकृत्य समुचिता सामयाचारिकधर्मविषयिणी व्यवस्था कर्तव्येति बहुभिर्लोकहितैषिभिर्मन्यते; यतः अन्यथा धर्मविप्लवनिरोधो नैव स्यात्॥

सुस्मरणीयचरित्रायाः सुगृहीतनामधेयायाः अस्माकं प्रथमाङ्गलचक्रवर्तिन्या विक्टोरियादेव्याः प्रसादाल्लब्धे राज्यकार्यनिर्वहणक्रमे हि दृश्यते प्रजानामभ्युदय एव राज्यबलमिति—तयैव दयामूर्त्या प्रकटीकृतं प्रतिष्ठापितं चाधिकारिकं विनयनम्। तया निर्दिष्टमेव प्रजापालनक्रममङ्गीचकार तस्याः सुमहितः पुत्रो महान् राजाधिराज श्चक्रवर्ती एड्वर्डाख्यः सप्तमः; प्रकृतिहितकरान् नवान् नियमविशेषांश्चाकारयत्, यथास्माकं भूयोभूयः श्रेयांसि सम्भवेयुः। तत्पुत्रः प्रजाप्रीतिपरिपूर्णविशालहृदयो राजपरमेश्वरः स्वनामभृदाङ्गलराजेषु पञ्चसङ्ख्यापूरको जार्जदेवः साम्राज्यप्राप्तिसमनन्तरं स्वयमेवात्रागत्य पाण्डवकथापरिमलपरिपूते इन्द्रप्रस्थसंनिहिते देहलीनगरे अस्मदनुग्रहार्थं पुनरपि मकुटधारणं कृत्वा सामन्तराजेभ्यः प्रकृतिमुख्येभ्यश्च यथोचितां पूजां गृहीत्वा प्रजोपकारकैः अनेकप्रसादविशेषैः अस्माननुजग्राहेति सुमहत् तस्येदं यशःपदम् अस्माकं च भागधेयम्। एवं च आङ्गलसाम्राज्यान्तःप्रवृत्तराजाधिकारनियन्त्रितपरिरक्षणानुगृहीतानामस्माकं भरतखण्डे नवनवोन्मेषशालिनी काप्यपूर्वा सुस्थितिर्वर्तत इति मोदन्ते सर्वत्र साधूनां चेतांसि॥

विद्यावृद्ध्या कृषिवृद्ध्या कार्मिकयवृद्ध्या वाणिज्यवृद्ध्या च दृश्यते तत्र तत्र गरीयसी अभ्युदयोन्मुखता अस्मासु। आशुगमनक्षमैर्यानविशेषैः तथैवाशुवृत्तान्तहरणप्रकारैश्च दूरान्तिकभेद एव तिरोहित इवाद्य दृश्यते; अतो देशभेदविषयकवैषम्याग्रहस्य को नामावकाशः! पुरा या आसीदस्मद्देशीयानामाचारव्यवहारविषयेषु अनुपमा अत्यन्तासंसृष्टा च केवलस्वनिष्ठता,नास्त्येवाद्य तस्याः पालने सामर्थ्यं वा प्रयोजनं वास्माकम्। धर्मकामयोः सिद्धिरर्थद्वारा भवतीति को वा न जानाति? अर्थार्जनं च भिन्नभिन्ने संनिवेशे भिन्नभिन्नैरुपायैरुपकरणैश्च साध्यमिति सर्वेऽप्यर्थार्जनप्रयत्नप्रवणा जानन्ति। देशे देशे विद्याविशेषाः प्रभवन्ति, कलाकौशलमभिवर्धते, शिल्पनैपुणी प्ररोहते,वाणिज्यप्रयोज्यवस्तूनि संभवन्तीति धनार्जनवृत्तस्य सर्वदा जागर्ति सार्वत्रिकता सर्वदेशमूलता च। अज्ञानापनोदनेन धनार्जनविषये चात्मगुप्तिविषये च सुसंस्कृता शक्तिः प्रजासु उपजायते। तया विरहितान् जनान् न कदापि जहाति दारिद्र्यदुर्दशा। यत्र च देशे प्रजावृद्धेरन्यूना न भवति धनवृद्धिः, तत्र दारिद्र्यं नैव पराभूयते। दारिद्र्यपीडितजनतायां धर्मचिन्तापि न स्यात्; कुतो वा धर्मपरिपालनप्रयत्नः? नवीनविद्याबलेन कलाकौशलेन शिल्पनैपुण्या विविधविचित्रयन्त्रोपकरणसहकृतकार्मिकयाविपुलतया सर्वत्रापिवाणिज्यविस्तृत्या च अधुनातननागरकताविशिष्टासु जनतासु सम्पद्वृद्धिरभिजायते। अस्मद्भारतीयजनता तावदत्यल्पसम्पद्युक्ता रिक्तप्रायेति राजकीयगणकोदाहृतसाधनसङ्ख्याभिः सुसंस्थापिता; अस्माकं दैनन्दिनानुभवेनापि तादृशी तस्याः स्थितिरिति सम्यगवगम्यते। रिक्ततया दीनता, दैन्येन निश्शक्तिता, अशक्त्या अनुत्साहः, अनुत्साहेन क्षेमक्षयः, इति नियतेयं कार्यकारणपरम्परा। तस्मादस्मज्जनतोज्जीवनाय किमद्य कर्तव्यमित्यत्र लोकहितैषिणस्तत्रभवन्तः प्रमाणम्॥

अपिच अस्माकं पालकप्रकाण्डस्य चक्रवर्तिनो जार्जदेवस्य विभूतिविशिष्टमास्थानमसन्निकृष्टे द्वीपान्तरे प्रविभाति। आङ्गलानां राज्यकार्यनिर्वहणतन्त्रे राज्ञो दण्डाधिकारः प्रजानां स्वातन्त्र्यं च समतया प्रवर्तते।तस्मात् यद्यद्विषये प्रजानां स्वातन्त्र्यदानेन राष्ट्रे राजाङ्गस्य वा जनाङ्गस्य वा न कापि हानिः स्यात्, तत्र सर्वत्र स्वातन्त्र्यप्रोत्साहनेन तासामात्मगुप्तौ शक्तिरुत्पाद्यते दृढीक्रियते च। अनेनैव

हेतुना अस्मत्सामयाचारिकधर्माणां कालोचितं संस्करणं राजचोदनेन विना अस्माभिरेव कर्तव्यम् । ईदृशं संस्करणं जनैरनुष्ठानेनानुगृहीतं चेत् तद्राजाज्ञाधिकरणेष्वपि निर्विवादमङ्गीक्रियत एव । तादृशसंस्करणकार्ये धर्मज्ञानां तत्रभवतां पारिषद्यानामस्त्यधिकार इत्यस्मिन् विषये नास्त्येव विचिकित्सावकाशः । "धर्मज्ञसमयः प्रमाणं वेदाश्च"—इत्यापस्तम्बाम्नातवाक्यात् धर्मज्ञकृतपौरुषेयव्यवस्थायाः धर्मोत्पादनविषये वेदसदृशं प्रामाण्यमस्तीति विज्ञायते । "यद्वै किञ्च मनुरवदत् तद्भेषजम्"—इति श्रुतिवाक्यप्रतिष्ठापितप्रामाण्येन भगवता मनुनापि धर्मपरिकॢप्तौ धर्मसंशयनिर्णये च शिष्टानां धर्मविदां ब्राह्मणानामधिकारोऽस्तीति स्फुटमेव समाम्नातम् । भृगुप्रोक्ते मानवधर्मशास्त्रे द्वादशाध्याये निःश्रेयससाधनरूपकर्मणां यथावदुपदेशानन्तरं तच्छास्त्रस्य रहस्यभूतः कश्चित् तत्त्वार्थः एवमुपदिष्टो दृश्यते—

"अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत् ।
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशङ्कितः ॥"

तत्रैव शिष्टलक्षणं चाप्युपदिष्टम्—

"धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः ।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ॥"—इति ।

अनेन शिष्टानां ब्राह्मणानाम् अनाम्नातधर्मप्रवचने अधिकारोऽस्तीति, तैः प्रोक्तधर्माणां प्रामाण्यमशङ्कनीयमिति च लभ्यते । ईदृशानां शिष्टानाम्—

"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥"—इति ।

मनुनैव लक्षितं धर्मज्ञत्वं स्वतस्सिद्धमिव भाति ; यतस्तेषां श्रुतिप्रत्यक्षहेतुत्वं शब्दानुगृहीतप्रत्यक्षानुमानाभ्यां समर्थनीयात् धर्मज्ञैः स्थापनीयात् श्रुतिस्मृत्योरैककण्ठ्यात् भिन्नं न भवति । ये वा एवंप्रकारेण श्रुतिस्मृत्योरैककण्ठ्यं साधयितुं समर्थाः, त एव शक्नुवन्ति वेदाविरुद्धान् समयान् प्रकल्पयितुम् ; नेतरे—इति तेषामेव धर्मज्ञत्वस्य साफल्यम् । धर्मज्ञसमयः प्रमाणमिति सूत्रव्याख्यानावसरे हरदत्तमिश्रैर्धर्मज्ञा मन्वादय इति यदुक्तं तेन उत्पाद्यमानः मन्वादिसदृशस्मृतिकर्तॄणामेव धर्मज्ञत्वं नेतरेषामिति वादः सर्वथा हास्यास्पदम्, यतो धर्मज्ञानामेव अशङ्कनीयप्रामाण्यविशिष्टसमयपरिकल्प-

नाधिकारः पुनः तादृशसमयकर्तॄणामेव धर्मज्ञत्वमित्यन्योन्याश्रयदाषदूषितः स वादः। तस्याङ्गीकरणेन सामयाचारिकधर्मव्यवस्थैव नितरामसम्भाव्या भवेत्। कलिवर्ज्यविषयसंख्यानानन्तरं तत्प्रामाण्यप्रतिष्ठापनार्थं सङ्कलितं सर्वैरपि धर्मशास्त्रकोविदैरङ्गीकृतं वर्तते वचनमेतत्—

"एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः।
निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः।
समयश्चापि साधूनां प्रमाणं वेदवद्भवेत्॥"—इति।

अत्रापि हि दृश्यते महात्मनां बुधानां साधूनां कालोचितसमयपरिकल्पनाधिकारः, तैः कल्पितानां समयानां प्रचारश्च॥

एवं च शिष्टानां धर्मविदां ब्राह्मणानां धर्मोत्पादकसमयपरिकल्पने अधिकारोऽस्त्येवेति निर्णीतम्। कति शिष्टा अनाम्नातं धर्मं परिकल्पयेयुरित्याकाङ्क्षायां वदति हि स एव भगवान् मनुः—

"दशावरा वा परिषद्यं धर्मं परिकल्पयेत्।
त्र्यवरा वापि वृत्तस्था त धर्मं न विचालयेत्॥' इति।

अत्र "परिकल्पयेत्" इत्यस्य पदस्य प्रयोगो न विस्मरणीयः। केचित्तु धर्मपरिकल्पनधर्मसंशयनिर्णययोः अर्थभेदो नास्तीति मन्यन्ते। तेषां मतमनुचितमसम्भावितं च। अनाम्नातधर्मप्रवचनं कथं वा धर्मसंशयनिर्णयः स्यात्? धर्मं परिकल्पयेदित्यनेन अभूतस्य कस्यापि धर्मस्य कापि नूत्ना उद्भूतिर्गृह्यते; सा चोपपद्यते ह्यनाम्नातधर्मप्रवचनविषये। धर्मसंशयनिर्णयस्तु, आम्नातेषु धर्मेषु, यत्र कुत्र वा परस्परबाधे सम्प्राप्ते तत्र तादृशबाधपरिहारपूर्वकम् अबाधितस्य कस्याप्याम्नातस्यैव धर्मस्य धर्म्यतया व्यवस्थापनमभिदधाति। अत्र अभूतधर्मस्योद्भूतेः प्रसक्तिरेव न विद्यते। धर्मसंशयनिर्णयेऽपि शिष्टाधिष्ठितायाः परिषदः अधिकारसद्भावे मानवं धर्मशास्त्रं प्रमाणम्। धर्मपरिकल्पनार्थमुपदिष्टायाः दशावरायाः परिषदः स्वरूपकथनानन्तरं दृश्यते ह्येष श्लोकः—

'ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च।
त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये॥"

तत्रैवोत्तरश्लोके एकोऽपि वेदविद्धर्मं व्यवस्येदित्युक्तत्वात् एकस्यापि वेदज्ञस्य धर्मसंशयनिर्णये अधिकारोऽस्तीति ज्ञायते। त-

स्मात् धर्मसंशयनिर्णयाय पूर्वोक्ता त्र्यवरा परिषद्वा एको वा वेदज्ञः अलमित्यवगम्यते । धर्मपरिक्लृप्तौ तावत्—

"त्रैविद्यो हेतुकस्तर्की नैरुक्तो धर्मपाठकः ।
त्रयश्चाश्रमिणः पूर्वे परिषत् स्याद्दशावरा ॥"

—इत्युक्तप्रकारा दशावरा वा, वृत्तस्था त्र्यवरा वा, परिषदेवालम् । अतः धर्मपरिक्लृप्तिरूपकार्यस्य धर्मसंशयनिर्णयरूपकार्यादपि गौरवाधिक्यमभिप्रेतमिति निश्चीयते । तादृशगौरवाधिक्यापादनं सहेतुकमेवेति ज्ञातुं सुशकम् । तस्मात् धर्मपरिक्लप्तिकार्यं धर्मसंशयनिर्णयकार्यात् भिन्नमिति, एतत्कार्यद्वयेऽपि शिष्टाधिष्ठिता ब्राह्मणपरिषत् प्रबलप्रमाणमानवधर्मशास्त्रचोदनयैवात्राधिकृता इति च सिद्धं भवति ॥

दृश्यते किल महामुनिव्यासप्रणीते महाभारते आश्वमेधिके पर्वणि कालवैलक्षण्येन धर्मवैलक्षण्यं भवत्येवेत्येतद्वचनम्—

"युगेष्वावर्तमानेषु धर्मोऽप्यावर्तते पुनः ।
धर्मेष्वावर्तमानेषु लोकोऽप्यावर्तते पुनः ॥"

अपि च देशकालावस्थादिभेदेन धर्माणां बहुविधत्वं जायत इति तस्मिन्नेव महाभारते आनुशासनिके पर्वणि प्रपञ्चितम्—

"धर्मा बहुविधा लोके श्रुतिभेदमुखोद्भवाः ।
देशधर्माश्च दृश्यन्ते कुलधर्मास्तथैव च ।
जातिधर्मा वयोधर्मा गुणधर्माश्च शोभने ।
शरीर काल-धर्माश्च आपद्धर्मास्तथैव च ।
एतद्धर्मस्य नानात्वं क्रियते लोकवासिभिः ॥"—इति ।

देशकालावस्थादिभेदेन यो भिन्नतां न याति, स साधारणो धर्मः । स च विष्णुस्मृतौ—

"क्षमा सत्यं दमश्शौचं दानमिन्द्रियनिग्रहः ।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया ।
आत्मवत्त्वमलोभत्वं देवतानां च पूजनम् ।
अनभ्यसूया च तथा धर्मः सामान्य उच्यते ॥"

—इति निरूपितः । ईदृशसाधारणधर्मभिन्नाः सामयाचारिकधर्माः सर्वेऽपि देशकालावस्थादिभेदेन भिद्यन्त एव । यथा वा कालस्य भे-

दः अनिवार्यः तथैव सर्वस्यापि समयकृतस्यासाधारणधर्मस्य कालोचितभेदोऽप्यनिवार्यः। अनिवार्यस्य निवारणे प्रयत्नः असाध्यसाधनयत्नवन्निष्फलः वृथाखेदावहश्च। अत एव धर्मव्यत्ययकारके कालभेदे सम्प्राप्ते तद्भेदानुगुण्येन धर्मभेदं व्यवस्थापयितुं सुधीभिः काले काले प्रयतितव्यम्। कालभेदस्यानिवार्यत्वात् धर्मभेदोत्पादनस्य साध्यत्वाच्च अयमेवात्र गन्तुं पन्थाः, लोकगुप्त्यै सौजन्यवृद्ध्यै निःश्रेयसलाभाय च ये धर्मशास्त्रमुपादिशन् तेषां महात्मानां सर्वेषामपीदमेव मतम्। धर्मभेदावश्यकताविर्भावेऽपि यदि स भेदो नोत्पाद्यते, तदा जनाः संवृतमिथ्याचारा वा असंवृतधर्मोल्लङ्घनपरा वा भवेयुः; धर्मस्यैव स्यादनिष्टत्वम्, कामचारस्य चानियन्त्रितं स्वातन्त्र्यम्॥

एवं सति, कुतो वा भवेदौचित्यमौदासीन्यस्य? भगवता श्रीकृष्णेन यदुदीरितं भगवद्गीतायां—

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥"

—इति, तेन धर्मग्लानेरधर्माभ्युत्थानस्य च निरोधे कर्तव्यता कीदृशीति सुव्यक्तमेव ज्ञायते। यदा भगवानपि तां कर्तव्यतां वोढुं सर्वदा सन्नद्धो भवति, तदा मानुषा धर्मज्ञाः कथं तामुपेक्षेरन्? यद्यपि भगवत्साध्यं धर्मसंस्थापनं मनुष्यैरसाध्यम्, तथापि तैरप्यस्मिन् विषये यथाशक्ति प्रयतितव्यमित्यत्र न कोऽपि सन्देहः। धर्मसंरक्षणार्था कर्तव्यता धर्मशास्त्रैरेव धर्मज्ञसभायां निक्षिप्ता। मनुना दत्तं धर्मपरिकल्पनाधिकारं धर्मसंशयनिर्णयाधिकारं च "यद्वै किञ्च मनुरवदत्तद्भेषजमिति ज्ञात्वापि कथं श्रद्धालवो धर्मज्ञाः परित्यजेयुः? एतादृशमहाकार्यनिर्वाहाय सदृशी शक्तिरस्मासु नास्तीति तैरभिधीयते चेत्, तदपि ते.ामौदासीन्यदोषपरिहाराय नालम्भवितुमर्हति। अहमनधिकारी कर्तव्यकरणे इति यो वा वदति, सः स्वकर्तव्यताभारमुद्वोढुं नोत्सहते—इत्येव तस्याशयस्य यथार्थं विवरणम्; यतः सर्वेऽपि जनाः स्वशक्तिमनतिक्रम्य स्वकर्तव्यतामुद्वोढुं सर्वदैव क्षमाः। शक्त्यतिक्रमणेन कर्तव्यकरणमपथ्यमसम्भावितं च, तन्न कदापि धर्म्यवर्गान्तःपाति भवेत्। अपि चात्र हृदि धार्यं महर्षिपराशरोक्तं वचनम्

"युगे युगे च ये धर्मास्तत्र तत्र च ये द्विजाः ।
तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः ॥"

—इति । साधुजनसङ्गतं तेषां साधुत्वस्यैव चिह्नं यदात्मनिनैच्यानुसन्धानं, तत् सुगुणविशेषत्वेन श्लाघार्हमपि, धर्मसंस्थापनविषयककर्तव्यताभारं धर्मज्ञेभ्यो नैवापसारयति । तादृशसुगुणसम्मानितानामस्त्येव कापि विशिष्टा धर्मज्ञता यया तेषां धर्मनिर्माणप्रयोज्यपारिषद्याधिकारः परिपूतः प्रवृद्धश्च भवति । तस्मात् तत्रभवद्भिः सर्वैरपि न केनापि कारणेन स्वाधिकारपरित्यागः कार्य इति दासजनोऽयं सप्रश्रयं प्रार्थयते ॥

भावादृशा धर्मनिर्माणाधिकारं परित्यजन्ति चेत् वेदवेदान्तचोदितसद्धर्मावलम्बिनां सर्वेषां के वा मार्गदर्शका भवेयुः ? तेषु दुर्बलानां कथं वा अपथप्रवृत्तिर्न स्यात् ? अपि च ब्राह्मणानां ब्राह्मण्यस्यैव प्रयोजनं लोकगुप्त्यर्थो व्यवसायः । तेन विना तेषां जन्मसाफल्यमेव न सिध्यति । कथमफलजीवनानां दैवनिवृत्तिर्वा पूजार्हता वा सम्भवेत् ? अवश्यंभाविकार्येष्वधिकृतानां स्वाधिकारानङ्गीकारेण सर्वत्र जनाङ्गेषु प्रजानां योगक्षेमनिर्वाहः सुदुष्करो भवेत् सर्वभूतहिते रतानां दयावतां धर्मज्ञानां सर्वथेदं दुष्करत्वं दुःखस्थानम् । तस्मात् स नुग्रहात्तत्रभवन्तो भवेयुरेवेति निश्चयः सञ्जायते । पराशरस्मृतौ वर्तमानस्य—

"सर्वे धर्माः कृते जाताः सर्वे नष्टाः कलौ युगे ।
चातुर्वर्ण्यसमाचारं किञ्चित्साधारणं वद ॥"

—इत्यस्य श्लोकस्य व्याख्याने माधवाचार्यैः, "कलौ प्राणिनां प्रयाससाध्ये धर्मे प्रवृत्त्यसम्भवात् सुकरो धर्मोऽत्र बुभुत्सितः" इति यदुक्तं, तेनावगन्तुं शक्यते धर्मस्य दुष्करत्वं केवलमधर्मस्योपकारकं भवतीति । अतः यथा वेदवेदान्तसंस्थापितसद्दर्शनानुष्ठानप्रचारयोर्हानिर्न स्यात, यथा वा प्रजानां हितवृद्धिः सम्भवेत्, धर्माचरणे गौरवबुद्धिः स्यात्, अधर्मानुगतिरप्रिया भवेत् तथा तत्रभवद्भिर्धर्मसंरक्षणं कर्तव्यम् । विचारणीयान् विषयान् तेन निर्दिष्टाः पण्डितवर्याः सप्रमाणं यथान्यायं च समर्पयेयुः दासस्याशक्तिकृतानुक्तिदोषान् अर्थदोषांश्च परया कृपया मर्षयन्तु तत्र भवन्तो भवन्तः ॥

म. रङ्गाचार्यः.

## NOTICE

1. "The Marriageable Age of Dvija Girls" (In Sanskrit) by Brahma Sri Pandit T V. Srinivasa sastri of the Mylapore Sanskrit College, showing that there is provision in the Hindu sastras for the marriage of Brahman and other Dvija girls for three or four years after puberty—Body of book 64 pp. Appendix containing a collection of all the authorities for and against. 88 pp.

Price 12 as.

2. A collection of all the authorities that may be quoted in the controversy of the "marriageable "Age of Dvija Girls." 88 pp. Price 6 annas.

Apply to R. SWAMINATHA AIYAR,
*Retired Dy., Collector—Mylapore.*

विज्ञापना

## विवाहकालविमर्शः

रजोदर्शनानन्तरं त्रिचतुरवर्षपर्यन्तं विवाहाभ्यनुज्ञोपपादकः मैलापुर संस्कृतविद्यामन्दिराध्यापकैः ब्रह्मश्री, टी. वी. श्रीनिवासशास्त्रिभिर्विरचितः 64 पृष्ठात्मकः, तदुपात्तसाधकबाधकप्रमाणपट्टिकया. 88. पृष्ठात्मिकया संवलितः.

मूल्यम् द्वादश (12) आणकाः.

ऋतुमतीविवाहस्य साधकबाधक प्रमाणानां पट्टिका.

मूल्यम् षट् (6) आणकाः

अपेक्षकैः निवेदनीयः — आर् स्वामिनाथार्यः
संस्कृतविद्यामन्दिर रथ्या.
मैलापुरम्.